तथाहि=जैसे कि। अभिषेकसमय एव=राज्याभिषेक के समय ही। एषां=इनकी (राजाओं की)। मङ्गलकलशजलैः=कल्याण-घटों के जलों से। दाक्षिण्यम्=उदारता। इव=मानो। प्रक्षाल्यते=धो दी जाती है। अग्निकार्यधूमेन=यज्ञादि के धुएं से। हृदयं=चित्त। मलिनीक्रियते इव=मानो दूषित (मलिन) कर दिया जाता है। पुरोहित (पुरोहितस्य)=पुरोहित की। कुशाग्र (कुशाग्राणि)=दर्भों (कुशाओं) रूपी। सम्मार्जनीभिः=झाडुओं से। क्षान्तिः=क्षमा। अपनीयते इव=मानो दूर कर दी जाती है। उष्णीषपट्टबन्धेन=रेशमी वस्त्र की पगड़ी बाँधने से। जरागमनस्मरणम्=वृद्धावस्था के आने की स्मृति। आच्छाद्यते इव=मानो ढक दी जाती है। आतपत्रमण्डलेन=छत्र-मंडल (तने हुए छाते) से। परलोकदर्शनम्=जन्मान्तर के प्रति देखना। अपवार्यते इव=मानो रोक दिया जाता है। सत्यवादिता=सत्य बोलना। चामरपवनैः=चँवर की हवा से। अपह्रियते इव=मानो उड़ा दिया जाता है। गुणा=गुण। वेत्रदण्डैः=बेंत की छड़ियों से। उत्सार्यन्ते इव=मानो दूर कर दिये जाते हैं। साधुवादाः=शुभ वचन। जयशब्दकलकलैः=जयकार की ध्वनियों से। तिरस्क्रियन्ते इव=तिरस्कृत कर दिये जाते हैं (दबा दिये जाते हैं)। यशः=कीर्ति। ध्वज पटपल्लवैः= पताका के वस्त्र के छोरों से। परामृश्यते इव=मानो पोंछ दी जाती है।

अनुवाद -

क्योंकि राज्याभिषेक के समय ही इन (राजाओं) की उदारता मानो मांगलिक कलशों के जल से धो दी जाती है। हृदय मानो हवन के धुएं से मलिन कर दिया जाता है। क्षमा मानो पुरोहित के कुशाग्र रूपी झाडुओं से बुहार दी जाती है। वृद्धावस्था के आने का स्मरण रेशमी वस्त्र की पगड़ी से मानो ढक दिया जाता है। जन्मान्तर के प्रति देखना मानो छत्र-मण्डल से रोक दिया जाता है। सत्य बोलना चँवर की हवा से मानो उड़ा दिया जाता है। गुण मानो बेंत की छड़ियों से दूर कर दिये जाते हैं। शुभ वचन (साधुवाद) मानो जयकार की ध्वनियों से दबा दिये जाते हैं। यश मानो पताका के वस्त्र के छोरों से पोंछ दिया जाता है।

टिप्पणी -

राज्याभिषेक के समय जो सामग्री प्रयुक्त होती है। उनमें ऐसी कल्पना की गयी है मानो वही सब क्रियायें और वस्तुएं राजाओं के गुणों को समाप्त कर देती हैं। तात्पर्य यह है कि राज्यलक्ष्मी के आते ही उदारता आदि गुणों को त्यागकर राजा लोग अभिमान आदि अवगुणों में प्रवृत्त हो जाते हैं।

संस्कृत-टीका (भा॰च॰सि॰च॰ टीका)

तदेव दर्शयति-तथाहीति। अभिषेकसमये राज्याभिषेकक्षणे एवैतेषां राज्ञां मङ्गलकलशजलैरिव कल्याण कुम्भोभिरिव दाक्षिण्यमनुकूलता प्रक्षाल्ये धावनविषयीक्रियते। अग्नीति। अभिषेकानन्तरं होमस्य सद्भावादग्नीत्युक्तम्। अग्निकार्यं होमादि तस्य धूमेन हृदयं स्वान्तं मलिनीक्रियते। राज्ञमिति शेषः पुरोहितेति। पुरोहितः पुरोधास्तस्य कुशाग्राणि दर्भाग्राण्येव सम्मार्जन्यो बहुकार्यस्ताभिरिव क्षान्तिः क्षमाह्रियते दूरीक्रियते। उष्णीषेति। उष्णीषो मूर्धवेष्टनं स एव पट्टबन्धस्तेनेव जरा विस्रसा तस्याः आगमनमागमस्तस्य स्मरणं स्मृतिराच्छाद्यत आव्रियते। आतपत्रेति। आतपत्रं छत्रं तस्य मण्डलेन निस्तलेन परलोकस्य भवान्तरस्य दर्शनमवलोकनमपसार्यते दूरीक्रियते। चामरेति। चामरं बालव्यजनं तस्य पवनैर्वीजनैरिव सत्यमवितथं वदतीत्येवंशीलः सत्यवादी तस्य भावस्तत्ता सा अपह्रियये ऽपहरणविषयीक्रियते। वेत्रेति। वेत्रदण्डैर्वेतसयष्टिभिरिव गुणाः शौर्यादय उत्सार्यन्ते दूरीक्रियन्ते। जयेति। जयशब्दस्य ये कलकलरवा कोलाहलशब्दास्तैरिव साधुवादाः ख्यातयस्तिरस्क्रियन्ते न्यक्क्रियन्ते। ध्वजेति। ध्वजा वैजयन्त्यस्तेषां पटा वस्त्रापि तेषां पल्लवैः प्रान्तैरिव यशः श्लोकः परामृश्यते परामर्शो लोपः स क्रियते।

व्याकरणात्मक विशेषतायें -

1. अभिषेकसमये- अभिषेकस्य (अभि √सिच्+घञ्=अभिषेकः) समयः इति अभिषेकसमयः इति ष॰तत्पु॰ तस्मिन्।
2. मङ्गलकलशजलैः- मङ्गलाय कलशाः इति च॰तत्पु॰। तेषां जलै॰ इति ष॰तत्पु॰।
3. प्रक्षाल्यते- प्र √क्षल् शौचकर्मणि कर्म वा॰ लट् ल॰ प्र॰पु॰ए॰व॰।
4. दाक्षिण्यम्- दक्षिणस्य भावः (दक्षिण+ष्यञ्) इति ष॰तत्पु॰।
5. अग्निकार्यधूमेन-अग्नेः कार्यमिति ष॰तत्पु॰। तस्य धूमेन इति ष॰तत्पु॰।
6. मलिनीक्रियते- मलिन शब्द+च्वि+√कृ कर्मवा॰ लट् ल॰ प्र॰पु॰ए॰व॰।
7. पुरोहितकुशाग्रसम्मार्जनीभिः- कुशानाम् अग्राः इति ष॰तत्पु॰। कुशाग्रम् एव सम्मार्जनी (सम् √मृज्+ल्युट्ङीप्) इति कुशाग्रसम्मार्जनी इति क॰धा॰। पुरोहितेन कृताभिः कुशाग्रसम्मार्जनीभिः इति तृ॰तत्पु॰।
8. अपनीयते- अप √नी कर्मवा॰ लट् ल॰ प्र॰पु॰ए॰व॰।
9. क्षान्तिः - √क्षम्+क्तिन् प्र॰वि॰ए॰व॰।
10. उष्णीषपट्टबन्धेन- उष्णीषस्य पट्टः इति ष॰तत्पु॰। तस्य बन्धेन इति।

ष०तत्पु०।

11. जरागमनस्मरणम्- जरायाः आगमनम् इति ष०तत्पु०। तस्य स्मरणम् इति ष०तत्पु०।

12. आच्छाद्यते- आ √छद् आच्छादने कर्मवा० लट् ल० प्र०पु०ए०व०।

13. आतपत्रमण्डलेन- आतपात् त्रायते इति आतपत्रम् आतपत्रस्य मण्डलेन इति ष०तत्पु०।

14. अपवार्यते- अप √वृ वरणे कर्म वा० लट् ल० प्र०पु०ए०व०।

15. परलोकदर्शनम्- परश्चासौ लोकः परलोकः (क०धा०) परलोकस्य दर्शनम् इति ष०तत्पु०।

16. चामरपवनैः- चामराणां पवनैः इति ष०तत्पु०।

17. अपह्रियते- अप √हृ कर्मवा० लट् ल० प्र०पु०ए०व०।

18. सत्यवादिता- सत्यतश्चासौ वादः सत्यवादः (क०धा०) सत्यवादः अस्य अस्तीति सत्यवादी, तस्य भावः।

19. जयशब्दकलकलैः- जय इव शब्दः जयशब्दः इति क०धा०स०। जयशब्दस्य कलकलैः इति। ष०तत्पु०।

20. तिरस्क्रियन्ते-तिरस् अव्यय √डुकृञ् करणे कर्मवा० लट् ल० प्र०पु०ए०व०।

21. ध्वजपटपल्लवैः- ध्वजस्य पटः इति ष०तत्पु०। तस्य पल्लवैः इति ष०तत्पु०।

22. परामृश्यते-परा √मृश् आमर्शने कर्मवा० लट् ल० प्र०पु०ए०व०।

विशेष - उत्प्रेक्षा अलंकार है।

तथाहि-केचिच्छ्रमवशशिथिलशकुनिगलपुटचपलाभि, खद्योतोन्मेषमुहूर्त-मनोहराभिः मनस्विजनगर्हिताभिः सम्पद्भिः प्रलोभ्यमानाः, धनलवलाभावलेपविस्मृत- जन्मानोऽनेकदोषो पचितेन दुष्टासृजेव रागावेशेन बाध्यमानाः, विविधविषयग्रासलालसैः पञ्चभिरप्यनेकसहस्रसंख्यै-रिवेन्द्रियैरायास्यमानाः, प्रकृतिचञ्चलतया लब्धप्रसरेणैकेनापि सहस्रतामिवोपगतेन मनसाकुलीक्रियमाणा विह्वलतामुपयान्ति।

शब्दार्थ -

तथाहि=जैसे कि। केचित्=कुछ लोग (राजा)। श्रम-वश-शिथिल-शकुनि-गल-पुट- चपलाभिः-श्रमवश=परिश्रम के कारण। शिथिल=काँपती हुयी। शकुनि=पक्षी की। गलपुट=गर्दन (के समान)। चपलाभिः=चञ्चल। खद्योतोन्मेषमुहूर्तमनोहराभिः-खद्योत=जुगनू (के)। उन्मेष= चमकने (के समान)।

मुहूर्त=क्षणिक (रूप से)। मनोहराभि:=मन को हरने वाली। मनस्विजन=ज्ञानियों के द्वारा। गर्हिताभि:=निन्दित। संपद्भि:=संपत्तियों के द्वारा। प्रलोभ्यमाना= ललचाये जाते हुए। धनलवलाभावलेपविस्मृतजन्मानोऽनेकदोषोपचितेन- धनलव=थोड़े से धन (के)। लाभ=प्राप्ति (के)। अवलेप=अभिमान। (अपने) जन्मानो=जन्म को। विस्मृत=भूले हुए। अनेक=बहुत से। दोषोपचितेन=दोषों से बढ़े हुए। दुष्टासृजेव दुष्ट=दूषित। असृजा=रक्त के। इव=समान। रागावेशेन-राग=आसक्ति की। आवेशेन=अधिकता से। बाध्यमाना:=पीडित किये जाते हुए। विविधविषयग्रासलालसै:=विविध=अनेक प्रकार के। विषय=विषयों के। ग्रास=उपभोग की। लालसै:=लालसा रखने वाली। पञ्चभिरप्यनेकसहस्रसंख्यैरिवेन्द्रियैरायास्यमाना: पञ्चभि: (संख्या में) पांच होते हुए। अपि=भी। अनेकसहस्रसंख्यैरिव=मानो कई हजार की संख्या वाली। इन्द्रियै:=इन्द्रियों के द्वारा। आयास्यमाना:=क्लेश पहुँचाये जाते हुए। प्रकृति=स्वभाव से। चञ्चलतया=चञ्चल होने के कारण। लब्धप्रसरेण=अवकाश मिलने से। एकेनापि=एक होते हुए भी। इव=मानो। सहस्रताम्=हजारों की संख्या को। उपगतेन=प्राप्त हुए। मनसा=मन से। आकुलीक्रियमाणा=व्याकुल किये जाते हुए। विह्वलताम्=उद्विग्नता को। उपयान्ति=प्राप्त करते हैं।

अनुवाद -

परिश्रम के कारण (मोरों अथवा) अन्य पक्षियों की काँपती हुयी गर्दन के समान चञ्चल, जुगनू की चमक के समान क्षण भर के लिए मन को हरने वाली, मनस्वी लोगों के द्वारा निन्दित सम्पत्तियों के द्वारा ललचाये जाते हुए, थोड़े से धन को पा जाने के गर्व से जन्म को भूल जाने वाले, अनेक दोषों के बढ़ जाने से दूषित रक्त के समान, राग के आवेश से बाध्य किये गये, अनेक प्रकार के विषय रूपी ग्रासों के लोभी, पाँच होते हुए भी अनेक सहस्रों की संख्या में प्रतीत होने वाली इन्द्रियों के द्वारा दु:खी किये गये, स्वभाव से चञ्चल होने के कारण प्रसार को प्राप्त हुए एक होते हुए भी मानो हजारों की संख्या को प्राप्त हुए मन के द्वारा आकुलित हुए (कुछ राजा लोग) व्याकुलता को प्राप्त करते हैं।

टिप्पणी -

प्रस्तुत अनुच्छेद में लक्ष्मी की चञ्चलता को कुछ उपमाओं के माध्यम से दर्शाया गया है- जिस प्रकार बहुत देर तक उड़ने के परिश्रम से थके हुए, हाँफते हुए पक्षियों की गर्दन हिलती रहती है उसी प्रकार यह लक्ष्मी भी स्थिर रुप से नहीं रहती और जिस प्रकार जुगनू की चमक क्षण भर के लिए आकृष्ट करती

है। जब तक ध्यान उसकी चमक पर जाता है तब तक वह अदृश्य हो जाती है उसी प्रकार लक्ष्मी के आने से उत्पन्न हुयी चकाचौंध क्षणिक रूप से व्यक्ति के मन को हरती है। यह लक्ष्मी अल्पमात्रा में भी किसी के पास आकर उसकी बुद्धि को ऐसा भ्रष्ट कर देती है कि वह अपने जन्म अर्थात् कुल परम्परा के विरुद्ध आचरण करने लगता है।

जिस प्रकार वात, पित्त और कफ के दोषों से विकृत हुआ रक्त मनुष्य को कष्ट पहुंचाता है उसी प्रकार विषय-भोगों में आसक्ति के बढ़ने से व्यक्ति व्याकुल हो जाता है। आसक्ति इतनी बढ़ जाती है कि ऐसा लगता है मानो श्रोत्र, त्वक्, नेत्र, जिह्वा तथा नासिका- ये पाँच ज्ञानेन्द्रियां पाँच न होकर हजारों हो गयी हों। इसी प्रकार चारों ओर विषय भोगों की ओर चलायमान रहती हैं। मन भी मानो एक न होकर हजार मन हो गये हों। इन सब कारणों से पाँच इन्द्रियां और एक मन भी मानो हजारों की संख्या में उपस्थित होकर उन राजाओं को व्याकुल कर देते हैं।

संस्कृत-टीका (भा०च०सि०च० टीका)

तदेव दर्शयति-तथाहीति। केचिन्मनुष्याः। श्रमेति। श्रमवशेन प्रयासाधिक्येन शिथिल-श्लथोऽदृढः शकुनेर्मयूरस्य अन्यस्य वा पक्षिविशेषस्य यो गलः कण्ठस्तस्य यत्पुटं तद्वच्चपलाभिः। मयूरस्य कण्ठः श्रमवशेन चात्यन्तं चपलः स्यादिति तदुपमानम्। खद्योत इति। खद्योतो ज्योतिरिङ्गणस्तस्य य उन्मेषोऽवभासस्तद्वन्मुहूर्तं मनोहराभिश्चित्तहारिणीभिः। मनस्वीति। मनस्विजनाः पण्डितलोकास्तैर्गर्हिताभिनिन्दिताभिरेवं विधाभिः सम्पद्भिः समृद्धिभिः प्रलोभ्यमाना लोभं प्राप्यमाणाः। धनेति। धनस्य द्रव्यस्य यो लवो लेशस्तस्य लाभः प्राप्तिस्तस्माद्योऽवलेपोऽहङ्कारस्तेन विस्मृतं विस्मरणं प्राप्तं जन्म येषां ते तथानैकेदोषा दूषणानि तैरुपचितेन व्याप्तेन। रागावेशेनेति। राग इच्छारुण्यं च तेषामावेशस्तन्मयीभावस्तेन बाध्यमानाः पीड्यमानाः केनेव। दोषेति। दोषं दुष्टं यदसृग्रक्तं तेनेव। तत्रापि रागो भवत्येवेति साम्यम्। विविधेति। विविधा येऽनेके विषया गोचरास्त एव ग्रासा गुडेरकास्तत्र लालसैर्लम्पटैः। पञ्चभिरिति। पञ्चभिरपि प्राणप्रमितसङ्ख्यैरपि चक्षुरादिभिरपि शतसहस्रतां लक्षतामुपगतेन अनेकसहस्रसङ्ख्यैरिन्द्रियैः करणैरायास्यमानाः। परिक्लिश्यमानाः। प्रकृतीति। प्रकृत्या स्वभावेन चञ्चलश्चपलस्तस्य भावस्तत्ता तया लब्धः प्रसरोऽवकाशो येनैवम्भूतेनैकेन मनसा चित्तेनाकुलीक्रियमाणा विह्वलतामुल्पिञ्जलतामुपयान्ति गच्छन्ति।

[व्या]करणात्मक विशेषतायें -

1. केचित्-किम् शब्द पुं॰प्र॰वि॰ब॰व॰+चित्।
2. श्रमवशशिथिल शकुनिगलपुटचपलाभिः- श्रमवशेन शिथिलः इति तृ॰तत्पु॰ शकुनीनां गलपुटः इति तृ॰तत्पु॰। श्रमवशशिथिलः यः शकुनिगलपुटः इति श्रमवशशिथिलशकुनिगलपुटः तद्वत् चपलाः ताभिः इति क॰धा॰ सम्पद्भिः का विशेषण।
3. खद्योतोन्मेषमुहूर्तमनोहराभिः- खद्योतानाम् उन्मेषः इति ष॰तत्पु॰। मूहूर्ताय मनोहराः इति च॰तत्पु॰। खद्योतोन्मेषवन्मुहूर्तमनोहराभिः इति कर्म॰धा॰। सम्पद्भिः का विशेषण।
4. मनस्विजनगर्हिताभिः- मनस्विनश्च ते जनाः मनस्विजनाः इति क॰धा॰। मनस्विजनैः गर्हिताः मनस्विजनगर्हिताः इति तृ॰तत्पु॰। ताभिः। संपद्भिः का विशेषण।
5. धनलवलाभावलेपविस्मृतजन्मानः- धनस्य लवलाभः इति ष॰तत्पु॰। तस्य अवलेपः इति ष॰तत्पु॰। तेन विस्मृतं जन्म येषां ते इति बहु॰। केचित् पद का विशेषण।
6. अनेकदोषोपचितेन-अनेके च ते दोषाः अनेकदोषाः इति क॰धा॰। तैः उपचितेन (उप √चि+क्त तृ॰वि॰ए॰व॰) इति तृ॰ तत्पु॰।
7. प्रलोभ्यमानाः- प्र √लुभ् गाहर्ये विमोहने+कर्मणि यक्+ शानच् पु॰प्र॰वि॰ब॰व॰। केचित् पद का विशेषण।
8. दुष्टासृजेव- दोषश्च असौ असृक् च इति कर्म॰। तेन।
9. रागावेशेन-रागस्य आवेशः (आ √विश्+घञ्) रागावेशः इति ष॰तत्पु॰, तेन।
10. विविधविषयग्रासलालसैः- विविधाः विषयाः इति कर्म॰। विविध विषयानां ग्रासः इति ष॰तत्पु॰। तेषां लालसा इति ष॰तत्पु॰। तैः।
11. आयास्यमानाः- आ √यस् प्रयत्ने+णिच्+शानच् पु॰प्र॰वि॰ब॰व॰। केचित् पद का विशेषण।
12. प्रकृतिचञ्चलतया- प्रकृत्या चञ्चलः इति तृ॰तत्पु॰। तस्य भावः प्रकृतिचञ्चलता, तया।
13. लब्धप्रसरेण- लब्धः प्रसरः येन सः इति बहु॰, तेन। मनसा पद का विशेषण।

14. उपगतेन- उप √गम्+क्त तृ॰वि॰ए॰व॰। मनसा पद का विशेषण।

15. आकुलीक्रियमाणा:- आकुल+च्वि √कृ+यक्+शानच् प्र॰वि॰ब॰व॰। केचित् पद का विशेषण।

16. उपयन्ति- उप √या लट् ल॰ प्र॰पु॰ब॰व॰।

विशेष -

श्रमवश..... गर्हिताभि: सम्पद्भि: में लुप्तोपमा। धनलवलाभ..... बाध्यमाना: में पूर्णोपमा। विविधविषय.... आकुलीक्रियमाणा: में उत्प्रेक्षा अलंकार है।

ग्रहैरिव गृह्यन्ते। भूतैरिवाभिभूयन्ते। मन्त्रैरिवावेश्यन्ते। सत्त्वैरिवावष्टभ्यन्ते। वायुनेवविडम्ब्यन्ते। पिशाचैरिव ग्रस्यन्ते।

शब्दार्थ -

इव=मानो। ग्रहै:=(राहु आदि) ग्रहों के द्वारा। गृह्यन्ते=पकड़ लिये जाते हैं। इव=मानो। भूतै:=(देवयोनि विशेष) भूतों के द्वारा। अभिभूयन्ते=आक्रान्त कर दिये जाते हैं। मन्त्रै:=(अभिचार मन्त्र अथवा तान्त्रिक मंत्र) मन्त्रों के द्वारा। आवेश्यन्ते=वश में कर लिये जाते हैं। सत्त्वै:=हिंसक जन्तुओं के द्वारा। अवष्टभ्यन्ते=बलपूर्वक पकड़ लिये जाते हैं। वायुना=वायु द्वारा। विडम्ब्यन्ते=इधर-उधर फेंक दिये जाते हैं। पिशाचै:=राक्षसों के द्वारा। ग्रस्यन्ते=ग्रस लिए जाते हैं।

अनुवाद-

(ऐसे राजा लोग) ग्रहों के द्वारा मानो पकड़ लिए जाते हैं। भूतों के द्वारा मानो दबोच लिए जाते हैं। मन्त्रों से मानो वश में कर लिए जाते हैं। हिंसक प्राणियों से मानो बलपूर्वक पकड़ लिए जाते हैं। वायु से मानो विक्षिप्त कर दिये जाते हैं। पिशाचों से मानो ग्रस लिए जाते हैं।

टिप्पणी -

सूर्य, चन्द्र, मंगल, बुध, गुरु, शुक्र, शनि, राहु और केतु ये नव ग्रह हैं। 'भूत' शब्द के अनेक अर्थ हैं, परन्तु प्रसंग के कारण वह यहाँ देवयोनिविशेष का वाचक है। मन्त्रों का अभिप्राय अभिचार अथवा तान्त्रिक मन्त्रों से है।

संस्कृत-टीका- (भा॰च॰सि॰च॰ टीका)

ग्रहैरिति। ग्रहै: शनैश्चरादिभिरिव गृह्न्ते ग्रहणविषयीक्रियन्ते। भूतै: पिशाचैरिवाभिभूयन्ते मन्त्रैरिति। मन्त्रा देवाधिष्ठातृकास्तैरिवावेश्यन्ते। मन्त्रेणान्यत्रावेश: क्रियते। यथा भूतमन्यत्र प्रवेश्यते। सत्त्वैरिव दुष्ट प्राणिभिरिवावष्टभ्यन्ते हठेन गृह्यन्ते। वायुनेव पवनेनेव विडम्ब्यन्त इतस्ततो

विक्षिप्यन्ते। पिशाचैरिव राक्षसैरिव ग्रस्यन्ते भक्ष्यन्ते।

व्याकरणात्मक विशेषतायें -

1. गृह्यन्ते- √ग्रह् ग्रहणे+कर्मणि यक् लट् ल॰ प्र॰पु॰ब॰व॰।
2. अभिभूयन्ते- अभि+√भू+यक् लट् ल॰ प्र॰पु॰ब॰व॰।
3. आवेश्यन्ते- आ √विश्+यक् लट्॰ ल॰ प्र॰पु॰ब॰व॰।
4. अवष्टभ्यन्ते- अव √स्तम्भ् रोधने धारणे च+यक् लट् ल॰ प्र॰पु॰ब॰व॰।
5. विडम्ब्यन्ते- वि √डम्ब् क्षेमे+यक् लट् ल॰ प्र॰पु॰ब॰व॰।
6. ग्रस्यन्ते- √ग्रस् अदने+यक् लट् ल॰ प्र॰पु॰ब॰व॰।

विशेष - उत्प्रेक्षा अलंकार है।

मदनशरैर्मर्माहता इव मुखभङ्गसहस्राणि कुर्वते। धनोष्मणा पच्यमाना इव विचेष्टन्ते। गाढप्रहाराहता इवाङ्गानि न धारयन्ति।

शब्दार्थ -

मदनशरैः=कामदेव के बाणों से। इव=के समान। मुखभङ्गसहस्राणि=हजारों मुख भंगिमाओं को। कुर्वते=करते हैं। मर्माहताः=मर्माहत हुए। धनोष्मणा=धन की गर्मी से। पच्यमानाइव=पकाये जाते हुए से। विचेष्टन्ते=विभिन्न प्रकार की चेष्टाओं को करते हैं। गाढप्रहाराहता=तीव्र प्रहार से घायल हुए। अङ्गानि=(शरीर के) अवयवों को। न धारयन्ति=(स्वयं) धारण नहीं करते हैं।

अनुवाद -

कामदेव के बाणों से मर्माहत होकर मानो हजारों प्रकार की मुख-भंगिमायें करते हैं (अर्थात् मुँह बनाते हैं)। धन की गर्मी से पकते हुए से अनेक चेष्टायें करते हैं। कठोर प्रहार से आहत हुए के समान अंगों का वहन (स्वयं) नहीं कर पाते।

संस्कृत-टीका- (भा॰च॰सि॰च॰ टीका)

मदनेति। मदनशरैः कामबाणैर्मर्मस्थला आहतास्ताडिता इव मुखभङ्गसहस्राण्यानन- विकृतिसहस्राणि कुर्वते घटयन्ति। धनेति। धनस्य द्रव्यस्योष्मा तापस्तेन पच्यमानाः पाकविषयीक्रियमाणा इव विचेष्टन्ते। विविधां चेष्टां कुर्वन्तीत्यर्थः। गाढेति। गाढस्तीव्रो यः प्रहारो लगुडादिना कुल्लण्टनं तेनाहता इवाङ्गानि हस्तपादादीनि न धारयन्ति न धर्तुं शक्नुवन्तीत्यर्थः।

व्याकरणात्मक विशेषतायें -

1. मदनशरैः- मदनस्य शरैः इति ष०तत्पु०।
2. मर्माहताः-मर्मणि आहताः (आ √हन्+क्त) स०तत्पु०।
3. मुखभङ्गसहस्राणि-मुखस्य भङ्गाः इति ष०तत्पु०। तेषां सहस्राणि इति ष०तत्पु०।
4. कुर्वते- √कृ लट् ल० प्र०पु०ब०व०। (आत्मनेपदी)
5. धनोष्मणा- धनस्य ऊष्मा इति ष०तत्पु०, तेन।
6. पच्यमानाः- √पच्+यक्+शानच् प्र०पु०ब०व०।
7. विचेष्टन्ते- वि+ √चेष्ट् चेष्टायां लट् ल० प्र०पु०ब०व०।
8. गाढप्रहाराहताः- गाढश्च यः प्रहारश्च इति कर्म०धा०। गाढ प्रहारेण आहताः इति तृ०तत्पु०।
9. धारयन्ति- √धृ लट् ल० प्र०पु०ब०व०।

विशेष - उत्प्रेक्षा अंलकार है।

कुलीरा इव तिर्य्यक् परिभ्रमन्ति। अधर्मभग्नगतयः पङ्गव इव परेण सञ्चार्यन्ते। मृषावादविषविपाकसञ्जातमुखरोगा इवातिकृच्छ्रेण जल्पन्ति।

शब्दार्थ -

कुलीरा इव=केकड़ों के समान। तिर्यक्=तिरछे (कुटिल) परिभ्रमन्ति=घूमते हैं। अधर्मभग्नगतयः- अधर्मेण=धर्महीनता (असत् आचरण) से, भग्नगतयः=टूटी हुयी चाल वाले। पङ्गव इव=पंगु के समान। परेण=दूसरे के द्वारा। सञ्चार्यन्ते=चलाये जाते हैं। मृषावाद=असत्यभाष्ण रूपी (झूठ बोलना)। विष=विष के। विपाक=परिणाम से। सञ्जात=उत्पन्न। मुखरोगा इव=(आननव्याधि) मुखरोगियों के समान। अतिकृच्छ्रेण=बहुत कठिनाई से। जल्पन्ति=बोलते हैं।

अनुवाद -

केकड़े की तरह टेढ़ा-मेढ़ा चलते हैं। पाप के कारण चलने में असमर्थ पंगु के समान दूसरे के द्वारा चलाये जाते हैं। (अर्थात् मंत्री आदि के द्वारा कर्त्तव्यपथ पर अग्रसर किये जाते हैं)। मिथ्या-भाषण रूप विष के परिणाम से उत्पन्न मुखरोगियों के समान अत्यन्त कष्ट से बोलते हैं।

टिप्पणी -

केकड़े के समान तिरछा चलने का अभिप्राय यहाँ कुटिल व्यवहार से है। अधर्म आचरण के कारण उनका उत्कर्ष रुक जाता है और वे उचित-अनुचित का विचार कर पाने में असमर्थ हो जाते हैं। अमात्यों आदि के सहारे से ही

राज-काज चला पाते हैं जिस प्रकार पैरों से विकलांग व्यक्ति दूसरे के सहारे से ही चल पाता है। जिस प्रकार विष का सेवन करने के परिणामस्वरूप चेहरा विकृत हो जाता है और व्यक्ति बड़ी कठिनाई से बोल पाता है उसी प्रकार अभिमान के कारण ऐसे लोग मुख को ऐसा बना कर रखते हैं कि वह विकृत सा लगता है और घमण्ड के कारण ठीक से बोल भी नहीं पाते।

संस्कृत-टीका – (भा०च०सि०च० टीका)

कुलीरेति। कुलीरा इव कर्कटा इव तिर्यक्तिरश्रवीना इव परिभ्रमन्ति परिभ्रमणं कुर्वन्ति। अधर्मेति अधर्मेणासदाचारणेन भग्ना भङ्गं प्राप्ता गतिर्गमनं सत्कर्मणि वृत्तिश्च येषामेवंभूताः पङ्गव इव खञ्जा इव परेणान्येन सञ्चार्यन्ते सञ्चरणशीलाः क्रियन्ते। मृषेति। मृषावादोऽसत्यभाषणं तस्य विपाकः परिणामस्तेन सञ्जातः समुत्पन्नो मुखरोगो येषामेतादृश इवातिकृच्छ्रेणातिकष्टेन जल्पन्ति ब्रुवन्ति।

व्याकरणात्मक विशेषतायें –

1. अधर्मभग्नगतयः–भग्ना गतिः येषां ते भग्नगतयः इति बहु०। अधर्मेण भग्नगतयः इति तृ०तत्पु०।
2. सञ्चार्यन्ते सम् √चर् गतौ+विच्+यक् लट् ल० प्र०पु०ब०व०।
3. मृषावादविषविपाकसञ्जातमुखरोगाः– मृषावादा एव विषाणि मृषावादविषाणि इति क०धा०। तेषां विपाकः मृषावादविषविपाकः इति ष०तत्पु०। तेन सञ्जातः मुखरोगः येषां ते इति बहु०।
4. जल्पन्ति– √जल्प् व्यक्तायां वाचि लट् ल०प्र०पु०ब०व०।

विशेष –

'कुलीरा इव' में पूर्णोपमा, अधर्म.... में पूर्णोपमा और पदार्थहेतुक काव्यलिङ्ग का सङ्कर है। अंतिम वाक्य में रूपक और पूर्णोपमा का सङ्कर है।

सप्तच्छदतरव इव कुसुमरजोविकारैरासन्नवर्त्तिनां शिरः शूलमुत्पादयन्ति। आसन्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति।

शब्दार्थ –

सप्तच्छद=सप्तपर्ण। तरव=वृक्ष। इव=के समान। कुसुमरजोविकारैरासन्नवर्त्तिनां कुसुमरज= पुष्पपराग (के)। विकारैः=विकारों से। आसन्न=समीप में। वार्त्तिनां=स्थित लोगों के। शिरः=सिर का। शूलम्=दर्द। उत्पादयन्ति=उत्पन्न करते हैं। रजो=रजो गुण। आसन्नमृत्यव इव=मरणासन्न के समान। बन्धुजनमपि=सम्बन्धी जनों को भी।

न=नहीं। अभिजानन्ति=पहचानते हैं।

अनुवाद -

जिस प्रकार सप्तच्छद वृक्ष फूलों के पराग के विकार से समीप स्थित लोगों के सिर में दर्द उत्पन्न कर देते हैं उसी प्रकार (वे राजा) कुसुम अर्थात् नेत्रों के रजोगुण से उत्पन्न विकार से समीपस्थ लोगों के सिर में दर्द उत्पन्न कर देते हैं। मरणासन्न व्यक्ति के समान सम्बन्धीजनों को भी नहीं पहचानते हैं।

टिप्पणी -

यहाँ 'कुसुमरजोविकारैः' के दो अर्थ निकलते हैं- राजाओं के पक्ष में 'नेत्ररोगरूपी रजोगुण से उत्पन्न विकारों से (कुसुम शब्द का एक अर्थ नेत्ररोग भी है) तथा सप्तपर्ण वृक्ष के पक्ष में 'पुष्प पराग के विकारों से' (यहाँ 'कुसुमरज का अर्थ पुष्प पराग होगा)। तात्पर्य यह है कि सप्तपर्ण वृक्ष के फूलों के पराग की कुछ ऐसी प्रवृत्ति होती है कि उसके सम्पर्क में आने वाले लोगों के सिर में दर्द कर देती है। उसी प्रकार ये राजा लोग रजो गुण के प्रभाव से कुछ ऐसी नेत्र-भांगिमायें करते हैं कि उनको देखकर समीपस्थ लोग परेशान हो जाते हैं, उनके सिर में दर्द होता है। मरणासन्न व्यक्ति तो मानसिक अवस्था ठीक न होने के कारण सम्बन्धी जनों को नहीं पहचानते और ये राजा लोग धन के अहंकार के कारण।

संस्कृत-टीका- (भा०च०सि०च० टीका)

सप्तेति। सप्तच्छद-तरव-इव विषमच्छदवृक्षा इव कुसुमानिनेत्राणि तेषां ये रजोभिर्गुणैर्विकारा विकृयस्तैः। पक्षे कुसुमरजोविकारैः पुष्परागविकृतिभिः। 'कुसुमं स्त्रीरजो नेत्रे' इत्यनेकार्थः। पार्श्ववर्तिनां समीपस्थायिनां शिरःशूलं मस्तकव्यथामुत्पादयन्ति जनयन्ति। सप्तपर्णकुसुमरजसः शिरः शूलोत्पादकत्वं वैद्यके प्रसिद्धम्। आसन्नेति। आसन्नः समीपवर्ती मृत्युर्येषां त एवंविधा इव बन्धुजनमपि स्वजनमपि नाभिजानन्ति नोपलक्ष्यन्ति।

व्याकरणात्मक विशेषतायें -

1. सप्तच्छदतरव- सप्तच्छदानां तरवः इति ष०तत्पु०।
2. कुसुमरजोविकारैः- कुसुमानांरजांसि कुसुमरजांसि इति ष०तत्पु०। कुसुमरजसां विकारैः इति ष०तत्पु०।
3. आसन्नवर्तिनां- आसन्नं वर्तन्ते ये तेषाम् इति बहु०। (आ √सद्+क्त। √वृत्+णिनि।

4. उत्पादयन्ति- उत् √पद् गतौ+ णिच् लट् ल॰ प्र॰पु॰ब॰व॰।

5. आसन्नमृत्यवः- आसन्नः मृत्युः येषां ते इति बहु॰।

6. अभिजानन्ति- अभि √ज्ञा लट् ल॰ प्र॰पु॰ब॰व॰।

विशेष - श्लेषानुप्राणित रूपक और पूर्णोपमा अलंकार है।

उत्कुपितलोचना इव तेजस्विनो नेक्षन्ते। कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते। जातुषाभरणानीव सोष्माणं न सहन्ते।

शब्दार्थ -

उत्कुपितलोचना इव=रुग्ण (रोगी) नेत्रों वाले (व्यक्ति) के समान। तेजस्विनो=प्रतापी मनुष्यों को (पक्ष में सूर्य आदि तेजस्वी पदार्थों को)। न=नहीं। ईक्षन्ते=देखते हैं। कालदष्टा इव काल=महाविषधर (अधिक विषैला साँप) दष्टा=काटे हुए, इव=के समान। महामन्त्रैरपि=(विष-वैद्यों के) शक्तिशाली मंत्रों से भी, पक्ष में सचिवों की बड़ी-बड़ी मन्त्रणाओं से भी। न प्रतिबुध्यन्ते=नहीं जागते हैं। जातुषाभरणानीव=लाख के बने आभूषणों के समान। सोष्माणं=तापयुक्त पदार्थों अथवा अग्नि को, पक्ष में तेजस्वी व्यक्ति को। न=नहीं। सहन्ते=सहन करते हैं।

अनुवाद -

जिस प्रकार नेत्ररोगी सूर्य आदि तेजस्वी पदार्थों को नहीं देखते हैं उसी प्रकार (ये राजा लोग) प्रतापी मनुष्यों को (ईर्ष्या के कारण) नहीं देखते हैं। जिस प्रकार महाविषधर से डसे हुए व्यक्ति ओझाओं के बड़े-बड़े (शक्तिशाली) मंत्रों से भी चेतना को प्राप्त नहीं करते हैं उसी प्रकार (राजा लोग) सचिवों की उत्कृष्ट मंत्रणाओं से भी सचेत नहीं होते हैं। जिस प्रकार लाख के बने आभूषण अग्नि को सहन नहीं करते हैं (अग्नि के सम्पर्क में आते ही पिघल जाते हैं) उसी प्रकार (ये राजा) तेजस्वी व्यक्ति को सहन नहीं करते हैं।

संस्कृत-टीका - (भा॰च॰सि॰च॰ टीका)

उदिति। उत्प्राबल्येन कम्पितं धूतं लोचनं नेत्रं येषामेवंविधा इव तेजस्विनः प्रतापवतः पुरुषान्निस्पृहान्नेक्षन्ते नावलोकयन्ति। पक्षे तेजस्विनः सूर्यादिकान्। कालदष्टेति। निषिद्धकाले सन्ध्यादिरूपे दष्टा भक्षिताः। सर्पेणेति शेषः। एवंविधा इव महामन्त्रैर्जाङ्गलीप्रभृतिभिः षाड्गुण्यादिभिरपि च प्रतिबुध्यन्ते न बोधं प्राप्नुवन्ति। जातुषेति। जातुषाभरणानि लाक्षानिष्पन्नभूषणानीव सोष्माणं तेजस्विनं पुरुषं न सहन्ते मृष्यन्ति।

व्याकरणात्मक विशेषतायें -

1. उत्कुपितलोचनाः उत्कर्षेण कुपिते उत्कुपिते (प्रादि) उत्कुपिते लोचने येषां ते इति बहु०।
2. तेजस्विनः- तेजः अस्यास्ति (तेजस्+विनि) द्वि०वि०ब०व०।
3. ईक्षन्ते- √ईक्ष् लट् ल० प्र०पु०ब०व०।
4. कालदष्टाः- कालेन दष्टाः इति तृ०तत्पु०।
5. प्रतिबुध्यन्ते- प्रति √बुध् बोधने+यक् लट् ल० प्र०पु०ब०व०।
6. जातुषाभरणानि- जतुना निर्मितानि। जतु+षुक्, अण्। जातुषानि च तानि आभरणानि इति कर्म० धा०।
7. सोष्माणम्- ऊष्मणा सहितम् इति तृ०तत्पु०।

विशेष - पूर्णोपमा अलंकार है।

दुष्टवारणा इव महामानस्तम्भनिश्चलीकृता न गृहृणन्त्युपदेशम्। तृष्णाविषमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति।

शब्दार्थ -

दुष्टवारणा इव=दुष्ट हाथी के समान। महामानस्तम्भ महा=बहुत बड़े, मान=परिमाण वाले, स्तम्भ=खम्भों से, निश्चलीकृता=स्थिर किये गये, पक्ष में-महा=अत्यधिक, मान=अहंकार रूपी, स्तम्भ=स्तम्भ से, निश्चलीकृत=जकड़े हुए। उपदेशम्=(महावत के) उपेदश को, पक्ष में-गुरुओं के सचिवों के उपदेश को। न=नहीं। गृहृणन्ति=ग्रहण करते हैं (मानते हैं)। तृष्णाविष=तृष्णारूपी विष से मूर्च्छिताः=सम्मोहित हुए। सर्वं=सबको। सुवर्णमयमिव=स्वर्ण निर्मित के समान। पश्यन्ति=देखते हैं।

अनुवाद -

दुष्ट हार्थियों के समान अत्यन्त अहंकार के द्वारा किये गये स्तम्भन से (हाथी के पक्ष में बड़े परिमाण वाले स्तम्भ द्वारा बांधने से) स्थिर होकर उपदेश ग्रहण नहीं करते (हाथी के पक्ष में सीख नहीं मानते। तृष्णारूपी विष से मोहित होकर सबको स्वर्णनिर्मित के समान देखते हैं।

संस्कृत-टीका- (भा०च०सि०च० टीका)

दुष्टेति। दुष्टवारणा इव मदोन्मत्तगजा इव महानत्युत्कृष्टो यो मानोऽहङ्कारस्तल्लक्षणो यः स्तम्भः स्थूणा तेन निश्चलीकृताः स्तब्धतां प्रापिताः सन्त उपदेशं शिक्षां न ग्रहृणन्ति नाददते। गजपक्षे महन्मानं

यस्यैवंविधो यः स्तम्भ आलानस्तम्भस्तेन निश्चलीकृता नद्धाः सन्त उपदेशं हस्तिपक। वाक्यं न गृह्णन्ति। अवगणयन्तीत्यर्थः। तृष्णेति। तृष्णैव विषं गरलं तेन मूर्च्छिता भ्रान्ताः कनकमयं सुवर्णमयमिव सर्वं पश्यन्ति विलोकयन्ति।

व्याकरणात्मक विशेषतायें -

1. दुष्टवारणाः- दुष्टाः वारणाः इति क०धा०।
2. तृष्णविषमूर्च्छिताः- तृष्णा एव विषम् इति क०धा०। तेन मूर्च्छिताः इति तृ० तत्पु०।
3. महामानस्तम्भनिश्चलीकृताः- महाश्चासौ मानश्च इति महामानः इति क०धा० महामान एव स्तम्भः महामानस्तम्भः इति क०धा०। तेन निश्चलीकृता इति तृ०तत्पु०।
4. महाश्चासौ मानश्च इति क०धा०। तेन स्तम्भवत् निश्चलीकृताः (निश्चल+च्वि √कृ+क्त प्र०वि०ब०व०) इति तृ० तत्पु०।

   दुष्टवारणः=महत् मानं परिमाणं यस्य स महामानः इति बहु०। महामानः स्तम्भः महामानस्तम्भः इति क०धा०। तेन निश्चलीकृताः इति तृ०तत्पु०।

विशेष -

'महामानस्तम्भनिश्चलीकृताः' में श्लेषानुप्राणित 'पूर्णोपमा' तथा 'रूपक' का सङ्कर है। 'तृष्णविष' में रूपक तथा 'कनकमयमिव' में गुणोत्प्रेक्षा होने से इन दोनों का सङ्कर है।

इषव इव पानवर्द्धिततैक्ष्ण्याः परप्रेरिता विनाशयन्ति। दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्महाकुलानि शातयन्ति।

शब्दार्थ -

इषव इव=बाण के समान। पानवर्द्धिततैक्ष्ण्याः=राजाओं के पक्ष में-मदिरापान से बढ़ी हुयी उग्रता वाले, बाणों के पक्ष में- शान पर घिसने से बढ़ी हुयी तीव्रता वाले। परप्रेरिताः=राजापक्ष में-दूसरों (धूर्तों) के द्वारा बढ़ाये गये उत्साह वाले, बाण के पक्ष में- पर अर्थात् अन्य अर्थात् धनुष के द्वारा प्रवृत्त किये गये। विनाशयन्ति= (राजा पक्ष में प्रजाओं को), (बाण पक्ष में अपने लक्ष्य को) नष्ट कर देते हैं। दूरस्थितान्यपि=ऊँचाई पर भी स्थित, राजा पक्ष में दूर बसे हुए भी। फलानि इव=(आम आदि) फलों के समान। दण्डविक्षेपैः=डण्डा फेंकने के द्वारा, राजा पक्ष में- दण्ड आदि नीतियों के अनुचित प्रयोग द्वारा। महाकुलानि=उच्च कुलों को। शातयन्ति=नष्ट कर देते हैं। (फलों के पक्ष में गिरा देते हैं।)

अनुवाद -

शान पर चढ़ा कर तीक्ष्ण (राजा पक्ष में मद्य पिलाकर उग्र) किये गये तथा धनुष से छोड़े गये (राजा पक्ष में दूसरों से प्रोत्साहित किये गये) बाणों के समान (राजा लोग दूसरों का) (बाण पक्ष में शत्रु का) विनाश करते हैं। दूरवर्ती (पेड़ में लगे हुए) फलों के समान उत्तम कुलों को अर्थात् कुलीनों को दण्डनीति के (अनुचित) प्रयोग से (फल पक्ष में डण्डे के फेंकने से) गिरा देते हैं। (राजा पक्ष में नष्ट कर देते हैं।

अर्थात् जिस प्रकार ऊँचाई पर लगे हुए फलों को (लोग) डण्डा फेंककर गिरा लेते हैं उसी प्रकार दूर स्थित उच्च कुलों को भी (ये राजा लोग) दण्डनीति के (अनुचित) प्रयोग से नष्ट कर देते हैं।

संस्कृत-टीका - (भा॰च॰सि॰च॰ टीका) -

इषव इति। पानं मधुपानं निशानघर्षणं च ताभ्यां वार्धितं तैक्ष्ण्यं मदक्रौर्यं प्रहारशक्तिश्च येषामेवंविधा इषव इव बाणा इव परोऽन्यो मन्त्री च ताभ्यां प्रेरिता नोदिता विनाशयन्ति विनाशं जनयन्ति। दण्डो यष्टिर्भागधेयश्च तयोर्विक्षेपाः प्रहारा दुर्दिनानि च तैर्दूरस्थितान्यपि दविष्ठदेशवर्तीन्यपि फलानीव सस्यानीव महाकुलानि महाभिजनानि शातयन्ति पीडयन्ति पातयन्त्यपि च।

व्याकरणात्मक विशेषतायें -

1. पानवर्द्धिततैक्ष्ण्याः- पानेन वर्द्धितं तैक्ष्ण्यं येषां ते इति बहु॰। इषवः तथा राजानः पदों का विशेषण।
2. परप्रेरिताः- परैः प्रेरिताः इति तृ॰ तत्पु॰।
3. विनाशयन्ति- वि+ √नश् अदर्शने+णिच् लट् ल॰ प्र॰पु॰ब॰व॰।
4. दण्डविक्षेपैः- दण्डानां विक्षेपैः इति ष॰तत्पु॰।
5. महाकुलानि- महान्ति कुलानि इति क॰धा॰।
6. शातयन्ति- √शद् शातने+णिच् लट् ल॰ प्र॰पु॰ब॰व॰।

विशेष - श्लिष्टपूर्णोपमा अलंकार है।

अकालकुसुमप्रसवा इव मनोहराकृतयोऽपि लोकविनाशहेतवः। श्मशानाग्नय इवातिरौद्रभूतयः। तैमिरिका इवादूरदर्शिनः।

शब्दार्थ -

अकालकुसुमप्रसवा इव=असमय में खिले हुए पुष्पों के समान। मनोहराकृतयोऽपि=सुन्दर आकृति वाले होते हुए भी। लोकविनाशहेतवः-लोक=लोगों

के, विनाश=नाश के, हेतवः=कारण होते हैं (पुष्प के पक्ष में संसार के विनाश के सूचक होते हैं)। श्मशानाग्नय=श्मशान की अग्नियों। इव=के समान। अतिरौद्र=अत्यन्त भीषण। भूतयः=सम्पत्तियों वाले (अग्नि पक्ष में राख वाले)। तैमिरिका=तिमिर रोगियों। इव=के समान। अदूरदर्शिनः=अदूरदर्शी (दूर तक न देख सकने वाले।

अनुवाद -

असमय में खिलने वाले फूलों के समान सुन्दर आकृति के होते हुए भी (वे राजा लोग) लोगों के विनाश के कारण (पुष्प पक्ष में सूचक) होते हैं। श्मशान की अग्नि के समान अत्यन्त भीषण ऐश्वर्य (अग्नि पक्ष में भस्म) वाले होते हैं। तिमिररोग (एक प्रकर का नेत्ररोग) के रोगियों के समान दूर की वस्तुओं को (राज पक्ष में दूरगामी परिणामों को) नहीं देख पाते हैं।

टिप्पणी -

बिना मौसम के फूलों का खिलना अपशकुन माना जाता है- "द्रुमौषधिविशेषाणामकाले कुसुमोद्गमः। फलप्रसवयोर्बन्धं महोत्पातं विदुर्बुधाः।।" तात्पर्य यह है कि फूल चाहे किसी भी समय में खिलें वे देखने में तो सुन्दर ही लगते हैं, परन्तु भिन्न ऋतु में खिलने वाले पुष्प महान उत्पातों के सूचक माने जाते हैं। उसी प्रकार लक्ष्मी के चक्कर में आये हुए ये राजा लोग हृदयाकर्षक स्वरूप वाले होते हुए भी प्रजा के विनाश के कारण बनते हैं जिस प्रकार तिमिर रोग का रोगी व्यक्ति दूरस्थित वस्तु को नहीं देख सकता है उसी प्रकार ये राजा अपने अनुचित कर्मों के दूरगामी परिणामों को नहीं जान पाते हैं।

संस्कृत-टीका- (भा०च०सि०च०टीका)

अकालेति। मनोहराश्चित्तहारिण्य आकृतय आकारा येषामेवंविधा अपि राजानो लोकविनाशहेतवो भवन्ति। सदाकृतिसाम्यादुपमानान्तरमाह- अकालेति। अकालेऽऋतौ कुसुमप्रसवा इव। तदुक्तम् 'द्रुमौषधिविशेषाणामकाले कुसुमोद्गमः। फलप्रसवयोर्बन्धं महोत्पातं विदुर्बुधाः'। श्मशानाग्नय इति। श्मशानं प्रेतवनं तस्याग्नय इवातिरौद्रा अन्येषां भयोत्पादिका भूतिः सम्पद्येषां ते तथा। पक्षेऽतिक्रूरा भूतिर्भस्म येषु। तैमिरिकेति। तिमिरं नेत्ररोगः स सञ्जातो येषां ते तैमिरिकास्त इवादूरदर्शिनः। भाविनं दोषं न पश्यन्तीत्यर्थः। दूरं परलोकं न पश्यन्तीत्यर्थो वा। पक्षेऽदूरदर्शिनः समीपस्थितवस्तुविलोकिनः।

व्याकरणात्मक विशेषतायें -

1. अकालकुसुप्रसवाः- कुसुमानां प्रसवा इति ष०तत्पु०। अकाले कुसुमप्रसवाः इति स०तत्पु०।

2. मनोहराकृतयः- मनोहरा आकृतिः येषां ते इति बहु०।
3. लोकविनाशहेतवः- लोकस्य विनाशः इति ष०तत्पु०। लोकविनाशस्य हेतवः इति ष०तत्पु०।
4. श्मशानाग्नयः- श्मशानस्य अग्नयः इति ष०तत्पु०।
5. अतिरौद्रभूतयः- अतिशयेन रौद्रा भूतिः येषां ते इति बहु०। भूतिर्भस्मानि सम्पत्तिहस्तिश्रृङ्गारयोः स्त्रियाम्' (मेदिनी कोश)।
6. तैमिरिकाः- तिमिरं सञ्जातं येषां ते इति बहु०।
7. अदूरदर्शिनः दूरं द्रष्टुं शीलं येषां ते दूरदर्शिनः (दूर √दृश्+णिनि प्र०वि०ब०व०) इति बहु०, न दूरदर्शिनः इति नञ् तत्पु०।

विशेष - श्लेष तथा पूर्णोपमा अलंकार है।

उपसृष्टा इव क्षुद्राधिष्ठितभवनाः। श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयन्ति। चिन्त्यमाना अपि महापातकाध्यवसाया इवोपद्रवमुपजनयन्ति।

शब्दार्थ -

उपसृष्टा इव=वेश्याओं के समान। भवनाः=घर। क्षुद्र (क्षुद्रैः)=नीच लोगों के द्वारा। अधिष्ठिताः=व्याप्त रहते हैं। प्रेतपटहा इव=मृतक के समीप में बजाये जाने वाले नगाड़ों के समान। श्रूयमाणा अपि=सुने जाते हुए भी। उद्वेजयन्ति=क्षोभ उत्पन्न करते हैं। महापातकाध्यवसाया इव=महापातकों को करने के विचार के समान। चिन्त्यमाना अपि=सोचे जाते हुए भी। उप्रदवम्=अशान्ति को। उपजनयन्ति=उत्पन्न करते हैं।

अनुवाद -

जिस प्रकार वेश्याओं के कोठे नीच लोगों से व्याप्त रहते हैं, उसी प्रकार (इन राजा लोगों के) महल भी विटों (धूर्तों) से आश्रित रहते हैं। जिस प्रकार मृतक के समीप बजाये जाने वाले वाद्य सुने जाते हुए भी उद्वेग को उत्पन्न करते हैं, उसी प्रकार (ये राजा) सुने जाकर भी क्षोभ उत्पन्न करते हैं अर्थात् इनके विषय में किये जाने वाले वार्तालाप अथवा संभाषण भी उद्वेग को उत्पन्न करते हैं। जिस प्रकार महापातकों को करने का विचार भी (हृदय में) अशान्ति को उत्पन्न कर देता है उसी प्रकार (इनके) विषय में सोचना भी अशान्त कर देता है।

टिप्पणी -

त्रिकाण्डशेष के अनुसार 'उपसृष्टा' का अर्थ रतिसंलग्ना गणिका है-

"उपसृष्टं मैथुनं स्यात्।" डा॰ वासुदेव शरण अग्रवाल ने अपनी पुस्तक "कादम्बरी एक सांस्कृतिक अध्ययन" (पृ॰134) में इस पंक्ति का अर्थ इस प्रकार से किया है- "उनके घरों में वेश्याओं का प्रवेश हो जाता है जैसे बुरे शकुन के रूप में शहद की मक्खियों ने घर में छत्ता रख लिया हो।" नीचे पादटिप्पणी में लिखा है- "हर्षचरित में जो बीस उपलिंग या अपशकुनों की सूची है उसमें आंगन में मधु के छत्तों से उड़कर मधुमक्खियों का घर में भर जाना भी एक बुरा निमित्त है" डॉ॰ अग्रवाल ने जो अर्थ इस वाक्य का किया है उसी के संदर्भ में लिखा है "क्षुद्रा शब्द वेश्या और मधुमक्खी दोनों अर्थों में प्रयुक्त है जो अमरकोश में है।"

कहीं-कहीं शव के आगे ढोल, नगाड़े व बाजे बजाते हुए उसे श्मशान ले जाने की परम्परा है। ऐसे अवसर पर बजाया जाने वाला नगाड़ा ही 'प्रेतपटह' कहलाता है। जिस प्रकार ब्रह्महत्या आदि महापातकों को न केवल करने से अपितु उनको करने के विषय में सोचने मात्र से चित्त अशान्त हो जाता है। उसी प्रकार ऐसे राजाओं के न केवल संपर्क में आने से, अपितु उनके विषय में विचार करने मात्र से शान्ति भंग हो जाती है। मनुस्मृति में (11.54) ब्रह्महत्या, मद्यपान, चोरी करना, गुरु पत्नी के साथ समागम तथा इन चारों पापों को करने वाले के साथ संसर्ग रखना यह पाँच महापातक कहे गये हैं-

"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
मद्यन्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"

संस्कृत-टीका -

उपसृष्टेति। उपसृष्टा बहिःकृता इव क्षुद्रैर्विटैरधिष्ठितमाश्रितं भवनं गृहं येषां ते तथा। श्रूयमाणा इति। श्रूयमाणा आकर्ण्यमाना अत्युद्वेजयन्त्युद्वेगं जनयन्ति। क इव। प्रेतपटहा इव यथा मृतकवाद्यानि निर्वेदमन्येषां समुत्पादयन्तीत्यर्थः। कस्मिंश्चिद्देशे मृतकानां पुरस्ताद्वाद्यानि वाद्यन्त इति देशाचारः। चिन्त्येति। चिन्त्यमाना अपि चेतसि स्मर्यमाणा अपि महापातकं स्त्रीहत्यादि तदध्यवसाया इव तदभिप्राया इवोपद्रवं वञ्चकादिदुःखमुपजनयन्ति निष्पादयन्ति।

व्याकरणात्मक विशेषतायें -

1. उपसृष्टाः- उप √सृज्+क्त+टाप् प्र॰वि॰ब॰व॰ राज। 'व्रश्चभ्रस्जसृजमृजयराजत-भ्राजच्छशां षः' (अष्टा॰ 8.2.136) के अनुसार 'सृज्' के जकार को षकार हो जाता है।

2. क्षुद्राधिष्ठितभवना:- क्षुद्रैः अधिष्ठितं भवनं येषां यासाञ्च ते ताश्च इति बहु०।
3. श्रूयमाणा:- √श्रु+यक्+शानच् प्र०वि०ब०व०।
4. प्रेतपटहा:- प्रेतानां पटहाः प्रेतपटहाः इति ष०तत्पु०।
5. उद्वेजयन्ति- उद्+विज् भयचलनयो:+णिच् लट् ल०प्र०वि०ब०व०।
6. चिन्त्यमाना: √चिन्त्+यक्+शानच् प्र०वि०ब०व०।
7. महापातकाध्यवसाया:- महान्तश्च ये पातकाश्च इति क०धा०। तेषाम् अध्यवसाया: इति ष०तत्पु०।
8. उपद्रवम् उप √द्रु+अप् द्वि०वि०ए०व०।
9. उपजनयन्ति- उप √जन् प्रादुर्भावे+णिच् लट् ल०प्र०वि०ब०व०।

विशेष - पूर्णोपमा अलंकार है।

अनुदिवसमापूर्यमाणाः पापेनेवाध्मातमूर्तयो भवन्ति। तदवस्थाश्च व्यसनशतशरव्यताम् उपगता वल्मीकतृणाग्रावस्थिता जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति।

शब्दार्थ -

अनुदिवसम्=प्रतिदिन। पापेन=पाप के द्वारा। आपूर्यमाणा इव=भरे जाते हुए से। आध्मातमूर्तयो= स्थूलशरीर वाले। भवन्ति=हो जाते हैं। च=और। तदवस्था:=उस प्रकार की अवस्था वाले (पाप से मोटे हुए शरीर वाले)। व्यसनशतशरव्यताम्शत=सैकड़ों, व्यसन=व्यसनों की शरव्यताम्=आश्रयता को। उपगता=प्राप्त हुए। पतितम्=गिरे हुए (पतित) अपि=भी। आत्मानं=स्वयं को। नावगच्छन्ति=नहीं जानते हैं। (जिस प्रकार) वल्मीकतृणाग्रावस्थिता=वल्मीक= बाँबी की, तृण=घास के, अग्र=आगे के भाग पर, अवस्थित=स्थित (रुके हुए)। जलबि़न्दव= जलबिन्दु (गिरते हुए अपने स्वरूप को नहीं जान पाते)।

अनुवाद -

प्रतिदिन मानो पाप से भरते हुए स्थूलदेह (फूले हुए शरीर वाले) हो जाते हैं और ऐसी अवस्था वाले होकर (वे राजा लोग) सैकड़ों दुर्व्यसनों के लक्ष्य बनकर बाँबी पर उगे हुए तृण के अग्रभाग पर अवस्थित जल-बिन्दु के समान पतित (राजा-पक्ष में अपने धर्म से च्युत और जलबिन्दु के पक्ष में भूमिच्युत) होने पर भी अपने को नहीं जानते हैं।

टिप्पणी -

यहाँ पर कवि ने उत्प्रेक्षा की है कि पाप कर्मों के फल से ही भरकर मानो ऐसे राजा लोगों का शरीर फूल जाता है, मोटा हो जाता है। मनु ने व्यसनों को काम तथा क्रोध से उत्पन्न माना है-

"मृगयाऽक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।
तौर्यत्रिकं वृथाटयां च कामजो दशको गणः॥
पैशुन्यं साहसं द्रोहं ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥" (मनु॰ 7.47-48)

अर्थात् शिकार, जुआ खेलना, परनिन्दा, परस्त्रीगमन आदि काम से उत्पन्न व्यसन हैं तथा चुगलखोरी, दुस्साहस और ईर्ष्या आदि क्रोध से उत्पन्न व्यसन हैं। यहाँ पर 'शत' शब्द का प्रयोग इन व्यसनों में तथा इनके अतिरिक्त व्यसनों में आसक्ति की अधिकता को प्रदर्शित करने के लिए किया गया है क्योंकि धर्मशास्त्र में सौ व्यसनों का कहीं उल्लेख नहीं मिला। दीमक व चींटी आदि जब धरती में अपना घर बनाती हैं तो मिट्टी को निकालकर वे ज़मीन में छेद करती हैं और उस मिट्टी का ढेर उस छेद के चारों ओर लग जाता है। इसी को वल्मीक अथवा लोकप्रचलित भाषा में बाँबी कहते हैं। प्रायः देखा जाता है कि धरती यदि थोड़ी नमीयुक्त भी दिखायी दे रही हो तब भी चींटियों द्वारा लगाये गये ढेर की मिट्टी विल्कुल सूखी हुयी होती है। इसी सन्दर्भ में कहा है कि बाँबी के ऊपर उगी हुयी घास की कोर से गिरने वाली जल की बूंद नीचे की उस सूखी मिट्टी में पूर्णरूप से समा जाती है उसके द्वारा सोख ली जाती है और उसे अपने गिरने का अपने अस्तित्व के समाप्त होने का आभास भी नहीं होता। उसी प्रकारदुर्व्यसनों में लिप्त हुए राजा लोग धर्म से पतित होते हुए अपने पतन को भी नहीं जान पाते हैं और अपना सर्वथा विनाश कर बैठते हैं।

संस्कृत-टीका (भा॰च॰सि॰च॰ टीका)-

अन्विति। अनुदिवसं प्रतिदिवसं पानेनैनमापूर्यमाणाभ्रियमाणा इवाध्मातमूर्तयः स्थूलदेहा भवन्ति। तदिति। सैवावस्था येषां ते तदवस्थाः च समुच्चयार्थः। एवंविधा व्यसनानां द्यूतादीनां शतं तस्य सख्यतां मित्रतामुपगतां प्राप्ताः। 'शरव्यताम्' इति पाठे तु शरव्यं लक्ष्यं तस्य भावस्तत्त्वमुपगता इत्यर्थः। वल्मीकेति। वल्मीकमुपदेहिकागृहं तस्य तृणानि नवादीनि तेषामग्राणि प्रान्तानि तेष्ववस्थिता ये जलबिन्दवस्त इव पतितमपि मनुष्यजन्मनः सृस्तमप्यात्मानं नावगच्छन्ति न जानन्ति।

व्याकरणात्मक विशेषतायें -

1. अनुदिवसम्-दिवसम् अनु (दिवसस्य पश्चात्) इति अव्ययी०।
2. आपूर्यमाणाः- आङ् √पूर्+यक्+शानच् प्र०वि०ब०व०।
3. आध्मातमूर्तयः- आध्माताः (आ √ध्मा शब्दाग्निसंयोगयोः+क्त) मूर्तयः येषां ते इति बहु०।
4. तदवस्थाः सैव अवस्था येषां ते इति बहु०।
5. व्यसनशतशरव्यताम्- व्यसनानां शतं व्यसनशतम् इति ष०तत्पु०। व्यसनशतस्य शरव्यं व्यसनशतशरव्यं इति ष०तत्पु०। तस्य भावः शरव्यता, ताम्।
6. वल्मीकतृणाग्रावस्थिताः- वल्मीकेषु जातानि तृणानि इति वल्मीकतृणानि इति स०तत्पु० वल्मीकतृणानां अग्राणि इति वल्मीकतृणाग्राणि इति ष०तत्पु० तेषु अवस्थिताः इति स०तत्पु०। जल बिन्दवः का विशेषण।
7. जलबिन्दवः- जलानां बिन्दवः इति जलबिन्दवः इति ष०तत्पु०।

विशेष - उत्प्रेक्षा अलंकार है।

विशेष-टिप्पणी -

इन सन्दर्भों के अध्ययन से तत्कालीन समाज के जनसाधारण में प्रचलित विश्वास एवं धारणाओं का चित्र उभर कर सामने आता है। प्रकृत प्रसंगों में ग्रहों द्वारा ग्रस्त होने, भूतों द्वारा पराभूत होने, मन्त्रों द्वारा वश में किये जाने, सत्त्वों (बलाओं) द्वारा रोके जाने, हिंसक प्राणियों द्वारा पकड़े जाने, वायुरोग द्वारा विचलित होने, पिशाचों द्वारा निगले जाने जैसे लोकविश्वास वर्णित हैं। कुछ अन्य धारणायें भी प्रचलित थीं जैसे-झूठ बोलने के कारण जिह्वा पक जाने से अत्यधिक कष्ट से बोलना, धूमकेतु के गिरने एवं असयम में उत्पन्न होने वाले फूलों को लोकविनाश का हेतु मानना, मृत व्यक्ति (प्रेत) को ले जाते हुए बजाये जाने वाले पटहों से व्याकुल होना, दिन प्रतिदिन मोटे होना मानो पाप के कारण फूलना, कुटिल आचार के लिए मुहावरे यथा केकड़ों की भाँति तिरछे चलना आदि।

अपरे तु स्वार्थनिष्पादनतत्परैर्धनपिशिग्रासगृध्रैरास्थाननलिनीबकैर्द्यूतं विनोद इति परदाराभिगमनं वैदग्ध्यमिति, मृगया श्रम इति, पानं विलास इति, प्रमत्तता शौर्य्यमिति, स्वदारपरित्यागोऽव्यसनितेति, गुरुवचनावधीरणमपरप्रणेयत्वमिति, अजितभृत्यता सुखोपसेव्यत्वमिति, नृत्यगीत-वाद्य-वेश्याभिसक्ती रसिकतेति, महापराधानाकर्णनं महानुभावतेति, परिभवसहत्वं क्षमेति, स्वच्छन्दता प्रभुत्वमिति, देवावमाननं महासत्त्वतेति, वन्दिजनख्यातिर्यश इति तरलतोत्साह इति, अविशेषज्ञतापक्षपातित्वमिति दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि विहसद्भिः

प्रतारणाकुशलैधूर्तैरमानुषोचिताभिः स्तुतिभिः प्रतार्य्यमाणा वित्तमदमत्तचित्ता निश्चेतनतया तथैवेत्यात्मन्यारोपितालीकाभिमाना मर्त्यधर्माणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः प्रारब्ध-दिव्योचितचेष्टानु भावाः सर्वजनस्योपहास्यतामुपयान्ति।

शब्दार्थ -

अपरे तु=दूसरे तो (कुछ राजा)। स्वार्थनिष्पादनपरैः=(स्वार्थ) अपने प्रयोजन की (निष्पादन) सिद्धि में (परैः) लगे हुए। धनपिशितग्रासगृध्रैः=(धनपिशित) धनरूपी माँस को (ग्रास) खाने में (गृध्रैः) गिद्धों के समान। आस्थाननलिनीबकैः=(आस्थान) राजभवन रूपी (नलिनी) कमलवन में (बकैः) बगुलों के समान। दोषानपिगुणपक्षमध्यारोपयद्भिः=(दोषान्) दोषों को (अपि) भी (गुणपक्ष) गुणसमूह के (मध्य) अन्तर्गत आरोपयद्भिः) आरोपित करने वाले। अन्तः भीतर (ही भीतर) स्वयमपि=स्वयं भी। विहसद्भिः=हंसने वाले। प्रतारणा=ठगी में। कुशलैः=निपुण। धूर्तैः=धूर्तों के द्वारा। द्यूतं=जुआ। विनोद=मनोरंजन है। इति=इस प्रकार। परदाभिगमनं=परस्त्रीगमन। (दूसरे की पत्नी के साथ सम्भोग करना) वैदग्ध्यम्=चतुरता है। मृगया=आखेट (शिकार)। श्रम इति=(व्यायाम) परिश्रम है इस प्रकार। पानं=मदिरापान। विलास=विलासिता (भोगविशेष) है। प्रमत्तता=गर्विता (प्रमाद अथवा असावधानी से काम करना अथवा आवश्यकता से अधिक आत्मविश्वासी होना)। शौर्यम्=पराक्रम (वीरता) है। स्वदारपरित्यागो=अपनी पत्नी का त्याग (छोड़ देना)। अव्यसनिता इति=व्यसन से मुक्त होना (अनासक्ति) है इस प्रकार। गुरुवचनावधीरणम्=गुरु के वचन (बात) की अवमानना (उल्लंघन)। अपरप्रणेयत्वमिति=पराधीनता का न होना है (पर-दूसरे की, प्रणेयत्वम्-अधीनता,अ=नहीं)। अजितभृत्यता=सेवकों का वश में न होना। सुखोपसेव्यत्वमिति=सुखापूर्वक सेवा करने देना है। नृत्य-गीत-वाद्य-वेश्याभिसक्ती=नाच-गानों-वाद्यों और वेश्याओं में आसक्ति। रसिकतेति=रसज्ञता है। महापराधानाकर्णनं=बड़े-बड़े अपराधों को न सुनना। महानुभावतेति=उदारहृदयता है। परिभवसहत्वं=(दूसरों के द्वारा किये गये) तिरस्कार को सहना। क्षमेति=क्षमा करना है इस प्रकार। स्वच्छन्दता=स्वैरिता (मनमानी करना)। प्रभुत्वमिति=ऐश्वर्य है इस प्रकार। देवावमाननं=देवताओं की अवहेलना। महासत्त्वतेति=महापराक्रमशाली होना है। वन्दिजनख्यातिः=भाट लोगों द्वारा की गयी प्रशंसा। यश इति=कीर्ति है इस प्रकार। तरलता=चञ्चलता। उत्साह इति=उत्साह है। अविशेषज्ञता=विशेष ज्ञान का न होना। अपक्षपातित्वम् इति=पक्षपात का न होना है इस प्रकार। अमानुषोचिताभिः=अलौकिक व्यक्तियों के लिए उपयुक्त। स्तुतिभिः=स्तुतियों के द्वारा। प्रतार्य्यमाणा=ठगे जाते हुए। वित्तमदमत्तचित्ता=(वित्त) धन के (मद) घमण्ड से (मत्त) उन्मत्त (चित्ता) मन वाले। निश्चेतनतया=चेतना

शून्य (विवेकहीनता) होने के कारण। तथैवेत्यात्मन्यारोपितालीकाभिमाना तथैव इति=ऐसा ही है इस प्रकार। आत्मनि=अपने में। आरोपित=(उन धूर्तों की बातों का) आरोप करके। अलीक=झूठा। अभिमाना=अभिमान करने वाले। मर्त्यधर्माणोऽपि=मरणशील होते हुए भी। आत्मानम्=अपने में। इव=मानो। दिव्यांशावतीर्णम्=अलौकिक अंश के अवतार को। सदैवतमिव=मानो देवत्व को। अतिमानुषम्=अतिमानवत्व को (मानवता से भी ऊपर और अधिक)।उत्प्रेक्षमाणाः=मानते हुए। प्रारब्धदिव्योचितचेष्टानुभावाः=(दिव्योचित) दिव्य जनों के अनुकूल (चेष्टानुभावाः) क्रियाओं और हावभावों को (प्रारब्ध) प्रारम्भ करने वाले। सर्वजनस्योपहास्यतामुपयान्ति= (सर्वजनस्य) सब लोगों की (उपहास्यताम्) हंसी के पात्र (उपयान्ति) बनते हैं।

अनुवाद -

दूसरे तो (कुछ राजा), अपने प्रयोजन की सिद्धि में लगे हुए, धन रूपी माँस को खाने में गिद्धों के समान, राजभवन रूपी कमलवन में बगुलों के समान, दोषों को भी गुण-समूह के मध्य आरोपित करने वाले (मानने वाले), भीतर ही भीतर स्वंय भी हँसने वाले, ठगी में निपुण धूर्तों के द्वारा-- 'जुआ मनोरंजन है' इस प्रकार, परस्त्रीगमन चतुरता है, शिकार (आखेट) परिश्रम है, मदिरापान विलासिता है, प्रमाद पराक्रम है, अपनी पत्नी का त्याग अनासक्ति है, गुरु के वचन की अवमानना पराधीनता का न होना है, सेवकों का वश में न होना सुखपूर्वक सेवा करने देना है, नाच-गानों-वाद्यों और वेश्याओं में आसक्ति रसज्ञता है, बड़े-बड़े अपराधों को न सुनना उदारहृदयता है, तिरस्कार को सहना क्षमा करना है, मनमानी करना ऐश्वर्य है, देवताओं की अवहेलना महापराक्रमशालित्व है, भाट लोगों द्वारा की गयी प्रशंसा कीर्ति है, चञ्चलता उत्साह है, विशेष ज्ञान का न होना पक्षपात का न होना है, इस प्रकार अलौकिक व्यक्तियों के लिए उपयुक्त स्तुतियों (प्रशंसाओं) के द्वारा ठगे जाते हुए, धन के घमण्ड से उन्मत्त मन वाले, विवेकहीनता के कारण 'ऐसा ही है' इस प्रकार अपने में (उन धूर्तों की बातों का) आरोप करके झूठा अभिमान करने वाले, मरणशील होते हुए भी अपने में मानो दिव्य अंश के अवतार को, मानो देवत्व को, अतिमानवत्व को मानते हुए दिव्य जनों के अनुकूल क्रियाओं और हाव-भावों को आरम्भ करते हुए सब लोगों की हँसी के पात्र बनते हैं।

टिप्पणी -

इस अनुच्छेद में मुख्य वाक्य है कि "कुछ राजा तो सब लोगों की हँसी के पात्र बनते हैं।" किस प्रकार? धूर्तों द्वारा की गयी अमानुषोचित प्रशस्तियों से ठगे जाते हुए "स्वार्थनिष्पादनतत्परैः, धनपिशितग्रासगृध्रैः, आस्थाननलिनीबकैः, दोषानपि गुणपक्षमध्यारोपयद्भिः, अन्तः स्वयमपि विहसद्भिः, प्रतारणाकुशलैः-

ये सब 'धूर्तै:' शब्द के विशेषण हैं और तृतीयान्त हैं। 'प्रतार्य्यमाणा से लेकर प्रारब्धदिव्योचितचेष्टानुभावा:' तक 'अपरे तु' के विशेषण हैं और प्रथमान्त हैं। 'द्यूतं विनोद इति' से 'अविशेषज्ञता अपक्षपातित्वमिति' तक अमानुषोचित प्रशस्तियां हैं जिनके द्वारा धूर्त लोग कुछ राजाओं को ठग लेते हैं।

'स्वार्थसिद्धि में लगे हुए' का तात्पर्य यह है कि वे अपने लाभ को देखते हुए उनकी चापलूसी करते रहते हैं और उनकी झूठी प्रशंसायें अपने स्वार्थ के लिए करते हैं। धन में माँस का आरोप किया है जिस प्रकार माँस को देखते ही गिद्ध उस पर टूट पड़ते हैं उसी प्रकार धन के पीछे ये धूर्त लोग लगे रहते हैं। जिस प्रकार कमलवन में बगुले कमल के पत्तों के बीच छिपकर मछलियों का शिकार करते हैं उसी प्रकार ये धूर्त राजभवन में रहते हुए ही वहाँ उपस्थित लोगों को ठगकर अपना काम निकाल लेते हैं।

ये धूर्त व्यसनों एवं दुर्गुणों की भी गुणों के रूप में प्रशंसा करके उन राजाओं को दोषों में ही उलझाये रखते हैं। और उनको ठग कर मन ही मन उपहास करते हैं। वे ठगी में कुशल धूर्त किस प्रकार दोषों को गुणों के रूपों में प्रतिपादित करते हैं- द्यूतक्रीडा (जुआ) महान अनर्थकारी है, महाभारत इसका उदाहरण है, तथापि वे उसे मनोरंजन का साधन बताते हैं। दूसरों की स्त्रियों के साथ सहवास को चतुरता बताते हैं जबकि वह अत्यन्त निकृष्ट एवं पापकर्म है। शिकार को अच्छा व्यायाम कहते हैं, परन्तु प्राणियों की हिंसा करना किसी भी प्रकार उचित नहीं है। मदिरापान प्रमुख महापातकों में से एक है पर उसे वे लोग (धूर्त) विलासिता कहते हैं। प्रमाद अथवा अवासधानी को वे शूरता कहते हैं प्रमाद-अर्थात् सेवकवर्ग और कर्मचारी कुछ भी करते रहें उचित अथवा अनुचित उन्हें कुछ न कहना शूरता है।

वे धूर्त लोग पत्नी के परित्याग को अनासक्ति कहते हैं जबकि विवाह-सूत्र में बंधने के बाद पत्नी धर्म का निर्वाह न करना भी पाप ही है। गुरुजनों के हितकारी वचनों की अवहेलना महान दोष है तथा समय बीतने पर उसके दुष्परिणाम भी सामने आते हैं, परन्तु उसे तो वे स्वाधीनता कहते हैं। दोषी सेवक को भी दण्ड न देना कभी-कभी कुल का समूल नाश कर देता है उसे वे सेवकवर्ग को सुखपूर्वक सेवा करने देना मानते हैं। अपमान को सहना तो कायरता की निशानी है जिसे वे सहनशीलता कहते हैं। चापलूस बन्दियों द्वारा की गयी झूठी प्रशस्तियों को अपना यशगान समझते हैं। अविशेषज्ञता को निष्पक्षता बताते हैं। अविशेषज्ञता अर्थात् कौन कर्मचारी किस कोटि का है इस विशेष ज्ञान का न होना परिश्रमी एवं आलसी, कार्यक्षम एवं अयोग्य सभी के साथ एक जैसा व्यवहार करने से उत्साही कर्मचारियों को भी प्रेरणा नहीं मिलती।

इस प्रकार वे ठगी में निपुण धूर्त लोग राजाओं के दोषों को भी गुणों के रूप में कहते हुए उनकी इस प्रकार झूठी प्रशंसा करते हैं जो देवताओं के अनुरूप होती है और वे राजा भी धन के घमण्ड से अपनी बुद्धि का प्रयोग न करते हुए उन सब बातों को सत्य मान लेते हैं और नश्वर प्राणी होते हुए भी स्वयं को देवताओं के समान मानते हुए उनके समान चेष्टाएं करने लगते हैं और हंसी के पात्र बनते हैं।

संस्कृति-टीका- (भा०च०सि०च० टीका)

अपरे त्विति। अपरेऽन्ये। तु पुनरर्थे। राजानः। श्रीमतां रोषान्तरमप्याह-अपरे त्विति। इति दोषानपि गुणपक्षमध्यारोपयद्‌भिर्धूर्तैर्विप्रतारकैः स्तुतिभिः प्रतार्यमाणाः सर्वजनस्योपहास्यतामुपहासयोग्यतामुपयान्ति प्राप्नुवन्तीत्यन्वयः। कीदृशैर्धूर्तैः। स्वेति। स्वस्यात्मनो योऽर्थः प्रयोजनं तस्य निष्पादनं करणं तत्र परैस्तत्परैः। धनमिति। धनं द्रव्यं तदेव पिशितं मांसं तस्य ग्रासो ग्रहणं तस्मिन्। गृध्रैर्दूरदृग्भिर्यथा। द्रव्यार्जनपरैरित्यर्थः। आस्थानेति। आस्थानं नृपोपवेशनस्थलं तदेव नलिनी कमलिनी तस्यां बकैर्धूर्तैः। यथा बका नलिनीमाश्रित्य तदाश्रयबलेन स्वात्मानमाच्छाद्य येन केन प्रकारेण परान्वञ्चयित्वाकस्मादेव परान्भक्षयन्ति तद्वदास्थानबलेन परान्वञ्चयित्वा स्वानि भक्षयन्ति। इतिशब्दार्थमाहद्यूतमिति। द्यूतं दुरोदरं विनोदः क्रीडामात्रम्। न चैतद्विहिते किंचित्पातकमस्तीति भावः। परेति। परदाराः परस्त्रियस्तेषामभिगमनं सम्भोगो वैदग्ध्यमिति चातुर्यमित्यर्थः। मृगयेति मृगयां मृगव्यां श्रम इति। अभ्यासः खुरलीति श्रमो योगाभ्यासः' इति कोशः। न तु परप्राणव्यापादनजनितं किमपि पातकमस्तीति भावः। पानमिति। पानं मद्यादीनां क्षीबतां शौर्यं सुभटकृत्यमिति। स्वेति। स्वस्य दाराः स्त्री तस्याः परित्यागं व्यजनमव्यसनितानासक्तिता इति। न तु धर्माधिक्यम्। गुरुरिति। गुरुर्हिताहितप्राप्तिपरिहारोपदेष्टा तस्यवचनं वचस्तस्यावधीरणमुल्लङ्घनमपर-प्रणेयत्वमन्यवश्यत्वम् 'वश्यः प्रणेयः' इति कोशः गुरुवचनावधीरणेन क्रूरोऽयं प्रभुरिति भियापरे सामन्तादयो पश्यत्वं प्रतिपद्यन्त इति तेषामाशयः। अजितेति। भिक्षार्थं ताडिता भृत्या यस्य राज्ञः सम्यक्सेवां कुर्वन्ति स जितभृत्योऽन्यस्त्वजितभृत्यस्तस्य भावस्तत्ता ताम्। इदं च नृपतेर्दूषणम्। वैगुण्ये भृत्यानामवश्यं शिक्षा प्रदातव्येति राजचिह्नम्। तदुक्तम्- 'शब्दमनमशठपालनमाश्रितभरणं च राजचिह्नानि' इति। तस्मिन्सुखोपसेव्यत्वं सुखोपसेवितुं योग्यः सुखोपसेव्यस्तस्य भावस्तत्त्वम्। सुखोपसेव्योऽयं नृप इति लोके ख्यातिमात्रं गुण आरोप्यते। नृत्येति। नृत्यं नाट्यम्, गीतं गानम्, वाद्यमातोद्यम्, वेश्या वारवध्वः, तास्वभिसक्तिमत्यासक्तचित्ततां रसिकता रसभिज्ञता इति। महेति। महापराधानां कौरवयुद्धादीनामवकर्णनं श्रवणं

महानुभावता महाधर्मिष्ठता। अदातृत्ववशात् मागधादिभिर्विहितस्य गालिप्रदानादिपराभवस्य तिरस्कृतेः महत्त्वं क्षमेति क्षान्तिः। स्वच्छन्दतां निरवग्रहतां प्रभुत्वमैश्वर्यम्। देवेति। देवा अर्हदादयस्तेषामवमाननमवगणनं महासत्त्वता महाधैर्यता। बन्दीति। बन्दिजना मागधादयस्तेषां ख्यातिं प्रसिद्धिम्। यशः श्लोक इति। एतेन पण्डितजनप्रदानं न श्लोक जनकमिति भावः। तरलतां चपलतामुत्साहः प्रगल्भता इति। अवीति। अविशेषज्ञतां विशेषाविशेषानभिज्ञतामपक्षपातित्वं माध्यस्थमिति। अत्र 'द्यूतम्' इत्यारभ्यपूर्वपूर्वस्योद्देश्य तयोत्तरोत्तरस्य बाध्यमानतया पूर्वस्मिन्दोष उत्तरस्य गुणस्यारोपः अत्राध्यारोपलक्षणो रूपकव्यासङ्ग जनकत्वं सातिशयसुखजनकत्वादिकं साम्यं स्वयमूहनीयम्। अथ धूर्तान्विशेषयन्नाह अन्त इति। अन्तर्मध्ये स्वयमप्यात्मनापि विहसद्भिर्हास्यं कुर्वद्भिः। अस्मद्विप्रतारणानभिज्ञ इति हास्यनियामकम्। प्रतारणा वञ्चना तत्र कुशलैरभिज्ञैः किं क्रियमाणा धनिनः। अमानुषलोको देवलोकस्तस्योचिताभिर्योग्याभिः। स्तुतेर्विशेषणम्। वित्तेति। वित्तस्य द्रव्यस्य मदस्तेन मत्तं चित्तं येषां ते तथा। अतएव निश्चेतनतया निर्गता चेतना ज्ञानं यस्मात्तस्य भावस्तत्ता तया। तथैवेति। यथा यथा प्रतार्यमाणस्तथैवेत्यर्थः। आत्मन्यारोपितं स्थापितमलीकं मिथ्याभिमानं यैस्ते तथा मर्त्यधर्माणोऽपि मर्त्यस्य मनुष्यस्य धर्मा गमनादयो येषामेवंविधा अपि। दिव्येति। दिव्या देवसम्बन्धिनो येंऽशा भागास्तैरवतीर्णमुत्पन्नमिव सदैवतमिव देवताधिष्ठितमिवातिमानुषं कर्मातिक्रम्यवर्तमानमात्मानमुत्प्रेक्षणामा मन्यमानाः। प्रारब्धेति। प्रारब्धा या दिव्योचिता देवजनयोग्याश्चेष्टाः क्रियास्ताभिरनुभावो माहात्म्यं येषां ते तथा। अन्वयस्तु प्रागेवोक्तः।

व्याकरणात्मक विशेषतायें -

1. स्वार्थ निष्पादनतत्परैः- स्वस्य अर्थः इति स्वार्थः इति ष०तत्पु०। स्वार्थस्य निष्पादनं इति स्वार्थनिष्पादनं इति ष०तत्पु०। (निस् √पद्+णिच्+ल्युट्)। तस्मिन् परः इति स० तत्पु०। तैः। धूर्तैः पद का विशेषण।
2. धनपिशितग्रासगृध्रैः- धनानि एव पिशितानि इति धनपिशितानि इति क०धा० समास। धनपिशितानां ग्रासाः इति ष०तत्पु०। तेषु गृध्रैः इति स०तत्पु०। धूर्तैः का विशेषण।
3. आस्थाननलिनीबकैः- आस्थानम् एव नलिनी इति आस्थाननलिनी इति कर्म०धा० समास। तस्यां बकैः इति आस्थाननलिनीबकैः इति स०तत्पु०। धूर्तैः का विशेषण।
4. विनोदः- वि √नुद्+घञ् प्र०वि०ए०व०।

5. परदाराभिगमनम्- परस्य दार: इति ष॰तत्पु॰। तै: सह अभिगमनम् इति तृ॰तत्पु॰।
6. वैदग्ध्यम्-विदग्धस्य भाव: इति वैदग्ध्यम् विदग्ध+ष्यञ्)।
7. पानम्- √पा+युच् 'आतो युच्' प्र॰वि॰ए॰व॰।
8. विलास:- वि √लस्+घञ् प्र॰वि॰ए॰व॰।
9. प्रमत्तता- प्र √मद्+क्त+तल्+टाप् प्र॰वि॰ए॰व॰।
10. शौर्यम्-शूर+ष्यञ्।
11. स्वदारपरित्याग:- स्वस्य दार: इति क॰धा॰। तस्य परित्याग: इति। ष॰तत्पु॰।
12. अव्यसनिता- न व्यसनिता (वि √अस्+ल्युट्+इनि+तल्+टाप्)।
13. गुरुवचनावधीरणम्- गुरो: वचनम् इति ष॰तत्पु॰। तेषां अवधीरणम् इति ष॰तत्पु॰।
14. अपरप्रणेयत्वम्- परै: प्रणेयत्वम् इति तृ॰तत्पु॰। न परप्रणेयत्वम् इति नञ् तत्पु॰।
15. अजितभृत्यता-जित: भृत्यो येन स: इति बहु॰। तस्य भाव: इति जितभृत्यता। न जितभृत्यता इति नञ् तत्पु॰।
16. सुखोपसेव्यत्वम्- सुखेन उपसेव्य: इति तृ॰तत्पु॰। तस्य भाव: (उप √सेव्+ण्यत्+त्व)।
17. नृत्यगीतवाद्यवेश्याभिसक्ति:- नृत्यं च गीतं च वाद्यं च वेश्या च इति द्वन्द्व स॰। तासु अभिसक्ति: इति स॰तत्पु॰। (अभि √सञ्ज्+क्तिन्)।
18. रसिकता- √रस्+ठञ्+टाप्।
19. महापराधानाकर्णनम्- महाश्चासौ अपराधश्च इति कर्म॰धा॰ (अप √राध्+घञ्)। तेषां अनाकर्णनम् इति॰ ष ॰तत्पु॰।
20. महानुभावता- महती अनुभावता (अनु √भू+घञ्+तल्+टाप्)।
21. परिभवसहत्वम्- परिभवस्य सहत्वं इति ष॰तत्पु॰ (परि √भू+अप्)।
22. क्षमा- √क्षम्+अङ्+टाप्।
23. स्वच्छन्दता-स्वच्छन्द+तल्+टाप्।
24. देवावमाननम्-देवानाम् अवमाननम् (अव √मान्+ल्युट्) इति ष॰तत्पु॰।
25. महासत्त्वता-महत् सत्त्वं महासत्त्वं इति क॰धा॰ (तल्+टाप्।)
26. बन्दिजनख्याति:- बन्दिनश्च ते जनाश्च इति कर्मधा॰। तै॰ख्याति: इति तृ॰तत्पु॰।
27. तरलता- तरल+तल्+टाप्।
28. उत्साह:- उत् √सह्+घञ्।

29. अविशेषज्ञता- न विशेषज्ञता (नञ्) विशेष √ज्ञा+क+तल्+टाप्)।
30. अपक्षपातित्वम्-न पक्षपातित्वम् इति नञ् तत्पु० (पक्षपात+इन+त्व)।
31. अध्यारोपयद्भिः- अधि+आङ् √रुह् विमोहने णिच्+शतृ तृ०वि० ब०व०। धूर्तैः पद का विशेषण।
32. विहसद्भिः वि √हस्+शतृ तृ०वि०ब०व०।
33. प्रतारणाकुशलैः- प्रतारणासु कुशलैः (स०तत्पु०), 'प्रतारणा' प्र √तृ+णिच्+युच्+टाप्।
34. अमानुषोचिताभिः- मानुषेभ्यः उचिता इति च०तत्पु०। न मानुषोचिताः इति नञ् तत्पु०। ताभिः। स्तुतिभिः पद का विशेषण।
35. प्रतार्यमाणाः- प्र √तृ+णिच्+युक्+शानच् प्र०वि०ब०व०। 'अपरे' पद का विशेषण।
36. वित्तमदमत्तचित्ताः वित्तस्य मद इति वित्तमदः इति ष०तत्पु०। वित्तमदेन मत्तं चित्तं येषां ते इति बहु०। 'अपरे' पद का विशेषण।
37. निश्चेतनया-निर्गता चेतना यस्मात् स निश्चेतनः इति बहु०। तस्य भावः इति निश्चेतनता। तया।
38. आरोपितालीकाभिमानाः- आरोपितः अलीकः अभिमानः यैः ते इति बहु०। अपरे पद का विशेषण।
39. मर्त्यधर्माणः- मर्त्यस्य धर्माः येषां ते इति बहु०। अपरे पद का विशेषण।
40. दिव्यांशावतीर्णम्- दिव्याः अंशाः इति कर्म०। दिव्यांशेभ्यः अवतीर्णम् इति पं०तत्पु०।
41. उत्प्रेक्षमाणाः- उत्+प्र √ईक्ष्+शानच् प्र०वि०ब०व०। अपरे पद का विशेषण।
42. प्रारब्धदिव्योचितचेष्टानुभावाः- प्रारब्धाः दिव्योचिताः चेष्टाः इति कर्म०। दिव्याय उचिताः इति दिव्योचिताः इति च०तत्पु। दिव्योचिताः चेष्टा इति कर्म० (ताभिः अनुभावो येषां ते इति बहु०। अपरे पद का विशेषण।
43. सर्वजनस्य-सर्वे जनाः सर्वजनः इति कर्म०। तस्य।
44. उपहास्यताम्-उप √हस् + ण्यत् + तल+टाप् द्वि०वि०ए०व०।
45. उपयान्ति- उप √या लट् ल०प्र०पु०ब०व०।

विशेष - रूपक और उत्प्रेक्षा अलंकार है।

आत्मविडम्बनाञ्चानुजीविना जनेन क्रियमाणामभिनन्दन्ति। मनसा देवताध्यारोपणप्रतारणासम्भूतसम्भावनोपहताश्चान्तः प्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते।

शब्दार्थ-

च=और। अनुजीविना=आश्रित (सेवक)। जनेन=जनों के द्वारा। क्रियमाणाम्=की जाती हुयी। आत्मविडम्बनाम्=अपनी विडम्बना (वञ्चना) की। अभिनन्दन्ति=प्रशंसा करते हैं। देवताध्यारोपणप्रतारणासम्भूतसम्भावनोपहता:= (देवता) देवत्व के (अध्यारोपण) आरोपण द्वारा (प्रतारणा) ठगे जाने से (सम्भूत) उत्पन्न (सम्भावना) देवरूपत्व के निश्चय से (उपहता:) नष्ट हुयी बुद्धि वाले। मनसा=मन ही मन। आत्मबाहुयुगलं=अपनी दोनों भुजाओं के। अन्त:प्रविष्टापरभुजद्वयमिव=(अन्त:) भीतर (प्रविष्टम्) छिपी हुयी (अपर) दसूरी (भुजद्वयम्) दो भुजाओं वाले (इव) के समान। सम्भावयन्ति=मानते हैं। स्वललाटम्=अपने मस्तक में। त्वगन्तरितम्=त्वचा के भीतर। तृतीयलोचनं-तीसरे नेत्र की। आशङ्कन्ते=आशंका करते हैं।

अनुवाद -

आश्रित जनों द्वारा की जाने वाली अपनी विडम्बना (अर्थात् दोषों को गुण बताकर की जाने वाली वंचना) का भी अभिनन्दन करते हैं। देवता के आरोप रूप वंचना से उत्पन्न देवत्व के निश्चय से नष्ट बुद्धि वाले (राजा) मन ही मन अपनी दोनों भुजाओं के भीतर अन्य दो भुजाओं की सम्भावना करते हैं (अर्थात् धूर्तों द्वारा ठगे जाते हुए अपने को चतुर्भुज विष्णु मान बैठते हैं) अपने ललाट में त्वचा से आवृत तीसरे नेत्र की आशंकाकरते हैं। (अर्थात् अपने को त्रिनेत्र शिव मानते हैं)।

टिप्पणी -

'अन्त:प्रविष्ट.... बाहुयुगलं' में अन्य दो भुजाओं की उत्प्रेक्षा करने से इस बात की व्यंजना होती है कि वे राजा अपने में विष्णुत्व की संभावना करने लगते हैं। इस प्रकार यहाँ उत्प्रेक्षा अलंकार द्वारा वस्तु ध्वनि की गयी है। डॉ॰ अग्रवाल का मत है- 'यहाँ गुप्तकालीन उन विष्णु-मूर्तियों की ओर संकेत है जिनके कंधे से कोहनी तक केवल दो भुजायें दिखाई जाती हैं और शेष दो कोहनी के पास से निकलती हुयी बनायी जाती हैं। उनके पीछे यही भावना रहती थी कि कन्धे से कोहनी तक के भाग में दो भुजाओं के भीतर दो और छिपी हुयी हैं। मथुरा संग्रहालय में इस प्रकार की कई मूर्तियां हैं। (काद॰सां॰अ॰, पृ॰127)।

'त्वगन्तरित॰' इत्यादि में भी ध्वनि है कि वे स्वयं को शिव समझने लगते हैं। डा. अग्रवाल का मत है- 'यह शिव की उन मूर्तियों की ओर संकेत है जिनमें तीसरा नेत्र नहीं बनाया जाता और समझा जाता था कि वह त्वचा के भीतर छिपा है।' (काद॰सां॰अ॰,पृ॰127)

संस्कृत-टीका- (भा॰चसि॰च॰ टीका) -

अनुजीविना जनेन सेवकजनेन क्रियमाणां विधीयमानामात्मविडम्बनाम-सद्गुणारोप- लक्षणामभिनन्दन्ति प्रशंसन्ति। चकारः पूर्वोक्तसमुच्चयार्थः। विभूतिमतां राज्ञां पुनर्दोषान्तरमाह- मनसेति। देवताया हरिहरादेरध्यारोपणं आरोपणं तेन विप्रतारणं वञ्चनं तस्मादिति। असदिति। असद्भूतासद्रूपा या सम्भावना देवरूपत्वेन निश्चयस्तेनोपहता विनष्टबुद्धयः। देवत्वाध्यारोपत्वनिमित्तमूलानि प्रदर्शयन्नाह-अन्तरिति। अन्तर्मध्ये प्रविष्टमपरमन्यद्भुजद्वयं यस्मिन्नेवंविधमिवात्मनो बाहुयुगलं स्वकीयं भुजयुगं सम्भावयन्ति सम्भावनाविषयीकुर्वन्ति। एतेन स्वस्मिंश्चतुर्भुजत्वं ख्यापितम्। त्रिनेत्रत्वमप्याह-त्वगिति। त्वक्कृतिस्तयान्तरितं पिहितं तृतीयं लोचनं यस्मिन्नेतादृशं स्वललाटं निजालिकमाङ्कन्त आरेकाविषयीकुर्वते।

व्याकरणात्मक विशेषतायें -

1. आत्मविडम्बनाम्-आत्मनः विडम्बना इति ष॰तत्पु॰। ताम्।
2. अनुजीविना- अनु+√जीव्+णिनि तृ॰वि॰ए॰व॰।
3. क्रियमाणाम्- √कृ+यक्+शानच्+टाप् द्वि॰वि॰ए॰व॰।
4. अभिनन्दन्ति- अभि √नन्द् समृद्धौ लट् ल॰प्र॰पु॰ब॰व॰।
5. देवताध्यारोपणविप्रतारणादसद्भूतसम्भावनोपहताः- देवतायाः अध्यारोपणम् इति ष॰ तत्पु॰। तदेव प्रतारणा इति कर्म॰। देवताध्यारोपणप्रतारणायाः सम्भूता या सम्भावना इति तृ॰तत्पु॰। तया उपहताः इति तृ॰तत्पु॰।
6. अन्तः प्रविष्टापरभुजद्वयम्-भुजयोः द्वयम् इति ष॰तत्पु॰। अपरं च तत् भुजद्वयं च इति कर्म॰। अन्तः प्रविष्टम् अपरभुजद्वयं यस्मिन् इति बहु॰। तम्।
7. आत्मबाहुयुगलम्-बाह्वोः युगलम् इति ष॰तत्पु॰। आत्मनः बाहुयुगलम् इति ष॰तत्पु॰।
8. सम्भावयन्ति-सम् √भू+णिच्+लट् ल॰प्र॰पु॰ब॰व॰।
9. त्वगन्तरिततृतीयलोचनम्- तृतीयञ्च लोकनञ्च इति कर्म॰। त्वचा अन्तरितमिति तृ॰तत्पु॰। त्वगन्तरितं तृतीयलोचनं यस्मिन् तम् इति बहु॰। स्वललाटं पद का विशेषण।
10. आशङ्कन्ते- आङ् √शङ्क शङ्कायाम् लट् ल॰प्र॰पु॰ब॰व॰।

विशेष - उत्प्रेक्षा अलंकार है।

दर्शनप्रदानमप्यनुग्रहं गणयन्ति। दृष्टिपातमप्युपकारपक्षे स्थापयन्ति। सम्भाषणमपि संविभागमध्ये कुर्वन्ति। आज्ञामपि वरप्रदानं मन्यन्ते। स्पर्शमपि पावनमाकलयन्ति।

शब्दार्थ -

दर्शनप्रदानमपि=दर्शन देने को भी। अनुग्रहं=प्रसाद (कृपा)। गणयन्ति=मानते हैं। दृष्टिपातमपि=देखने को भी। उपकारपक्षे=उपकार की श्रेणी में। स्थापयन्ति=रखते हैं। सम्भाषणमपि=वार्तालाप को भी। संविभागमध्ये=पारितोषिक की कोटि में। कुर्वन्ति=मानते हैं। आज्ञामपि=आज्ञा को भी। वरप्रदानं=वरदान। मन्यन्ते=मानते हैं। स्पर्शमपि=छूने को भी। पावनं=पवित्र (करना)। आकलयन्ति=समझते हैं।

अनुवाद -

दर्शन देना भी कृपा करना समझते हैं (अर्थात् लोगों को अपना दर्शन दे देना वो उन पर बड़ा अनुग्रह करना समझते हैं)। आखों से देख भर लेने को भी उपकार की श्रेणी में रखते हैं। संलाप की भी द्रव्य-दान के बीच गणना करते हैं। अर्थात् बातचीत कर लेने भर को वे द्रव्य-दान समझते हैं। आज्ञा को भी वरदान देना मानते हैं। स्पर्श को भी पवित्र करने वाला समझते हैं।

संस्कृत-टीका- (भा०च०सि०च० टीका)

दर्शेति। लोकानां दर्शनप्रदानं स्वात्मप्रकटनमनुग्रहं प्रसादं गणयन्ति मन्यन्ते। दृष्टीति। दृष्टयाश्चक्षुषः पातमवलोकनं तदप्युपकारपक्ष उपकृतिपक्षे स्थापयन्ति निक्षिपन्ति। सम्भाषेति। सम्भाषणं जल्पनं तदपि सम्विभागः पारितोषिकं दानं तन्मध्ये कुर्वन्ति। पारितोषिकतुल्यं गणयन्तीत्यर्थः। आज्ञामिति। आज्ञामपि निदेशमपि वरप्रदानं समीहितप्रदानं मन्यन्ते जानन्ति। स्पर्शः संश्लेषस्तदपि पावनं पूतं पवित्रतामाकलयन्ति विचारयन्ति।

व्याकरणात्मक विशेषतायें -

1. दर्शनप्रदानम्-दर्शनस्य प्रदानं इति ष०तत्पु०।
2. अनुग्रहम्-अनु √ग्रह्+अच् द्वि०वि०ए०व०।
3. दृष्टिपातम्-दृष्टयाः पातम् इति ष०तत्पु०।
4. उपकारपक्षे- उपकारस्य पक्षः इति ष०तत्पु० तस्मिन्।
5. गणयन्ति- √गण् संख्याने लट् ल०प्र०पु०ब०व०।
6. सम्भाषणम्- सम् √भाष्+ल्युट्।
7. संविभागमध्ये-संविभागस्य मध्ये इति ष०तत्पु०।
8. वरप्रदानम्- वरस्य प्रदानम् इति ष०तत्पु०।
9. मन्यन्ते- √मन् लट् ल०प्र०पु०ब०व०।
10. स्पर्शम्- √स्पृश्+घञ् द्वि०वि०ए०व०।
11. पावनम्- √पू+णिच्+ल्युट् द्वि०वि०ए०व०।
12. स्थापयन्ति- √स्था णिच् लट् ल०प्र०पु०ब०व०।

13. सम्भाषणम्- सम् √भाष्+ल्युट् द्वि॰वि॰ए॰व॰।
14. आकलयन्ति- आ√कल् गतौ संख्याने च लट् ल॰प्र॰पु॰ब॰व॰।

विशेष - प्रतीयमान-उत्प्रेक्षा अलंकार है।

मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः। न पूजयन्ति द्विजातीन्। न मानयन्ति मान्यान्। नार्चयन्त्यर्चनीयान्। नाभिवादयन्त्यभिवादनार्हान्। नाभ्युत्तिष्ठन्ति गुरून्।

शब्दार्थ -

मिथ्या=झूठी। माहात्म्य=महानता। (के) गर्व=घमण्ड (से)। निर्भराः=परिपूर्ण। देवताभ्यः=(विष्णु आदि) देवताओं को। न प्रणमन्ति=नमस्कार नहीं करते हैं। द्विजातीन्=ब्राह्मणों की। न पूजयन्ति=अर्चना नहीं करते हैं। मान्यान्=माननीयों (का)। न मानयन्ति=सत्कार नहीं करते हैं। अर्चनीयान्=पूजा करने योग्य व्यक्तयों की। नार्चयन्ति=पूजा नहीं करते हैं। अभिवादनार्हान्=अभिवादन (चरणस्पर्श आदि) करने योग्य जनों को। नाभिवादयन्ति=अभिवादन नहीं करते हैं। गुरून्=गुरुजनों के (सम्मान में)। नाभ्युत्तिष्ठन्ति=उठकर खड़े नहीं होते हैं।

अनुवाद -

झूठी महिमा के गर्व से परिपूर्ण (वे राजा) देवताओं को प्रणाम नहीं करते। ब्राह्मणों की पूजा नहीं करते। माननीय व्यक्तियों का सम्मान नहीं करते। पूज्य लोगों की पूजा नहीं करते। अभिवादन करने योग्य व्यक्तियों का अभिवादन नहीं करते। गुरुजनों के सम्मान में उठकर खड़े नहीं होते हैं।

टिप्पणी -

तात्पर्य है कि धन के घमण्ड से इतने अभिमानी हो जाते हैं कि किसी का भी उचित प्रकार से सम्मान नहीं करते और इस प्रकार अपना ही नुकसान करते हैं। धर्मशास्त्र में कहा भी गया है-

"अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।" (मनु॰- 2.221)

अर्थात् गुरुजनों का नित्य अभिवादन करने वाले के आयु, विद्या, यश और बल ये चारों बढ़ते हैं।

संस्कृत-टीका (भा॰च॰सि॰च॰ टीका)-

मिथ्येति। मिथ्या वृथा यो माहात्म्यगर्वो माहात्म्याभिमानस्तेन निर्भरा धृता देवताभ्योऽर्हद्भ्यो न प्रणमन्ति नमस्कारं न कुर्वन्तीत्यर्थः। मान्यानिति। मान्यान्माननीयान्न मानयन्ति न सम्मानं ददते। नेति। अर्चनीयानर्चायोग्यान्नार्चयन्ति नार्चां कुर्वन्ति। नेति।

अभिवादनार्हानुपसङ्ग्रहयोग्यान्नाभिवादयन्ति न पादग्रहणं कुर्वन्ति। नेति। गुरून्हिताहितप्राप्तिपरिहारोपदेष्टातॄन् न अभ्युत्तिष्ठन्ति नाभ्युत्थानं कुर्वन्ति।

व्याकरणात्मक विशेषतायें -

1. मिथ्यामाहात्म्यगर्वनिर्भराः- महाश्चासौ आत्मा महात्मा तस्य भावः माहात्म्यम् (माहात्म्य+ष्यञ्)। मिथ्या माहात्म्यम् इति कर्म०। मिथ्यामाहात्म्यस्य गर्वः इति ष०तत्पु०। मिथ्यामाहात्म्यगर्वेण निर्भराः इति तृ०तत्पु०।
2. देवताभ्यः-देजता पद च०वि०ब०व०। प्र √नम् के योग में चतुर्थी विभक्ति का प्रयोग।
3. मान्यान्- √मान् पूजायाम्+ण्यत् द्वि०वि०ब०व०।
4. अर्चनीयान्- √अर्च् पूजायाम्+अनीयर् द्वि०वि०ब०व०।
5. अभिवादनार्हान्- अभिवादनम् अर्हन्ति ये तान् इति बहु०। 'पादग्रहणमभिवादनम्'। (अमर०)।

'प्रणमन्ति' आदि सभी क्रियापद लट् ल०प्र०पु०ब०व० के प्रयोग हैं। उपसर्ग- और धातु क्रमशः इस प्रकार हैं- प्र√नम्, √पूज्, √मान्, √अर्च्, अभि √वद्+णिच्, अभि+उत् √स्था।

अनर्थकायासान्तरितविषयोपभोगसुखमित्युपहसन्ति विद्वज्जनम्। जरा वैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम्। आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय। कुप्यन्ति हितवादिने।

शब्दार्थ -

अनर्थकः=निष्फल (निरर्थक)। आयास=प्रयास। अन्तरात=(वंचित) व्यवहित। विषयोपभोगसुखम्=विषयों के आस्वादन सुख। इति=इस प्रकार। विद्वज्जनम्=विद्वानों का। उपहसन्ति=उपहास करते हैं। जरा वैक्लव्यप्रलपितमिति=(जरा) बुढ़ापे की। वैक्लव्य=विकलता से (प्रलपितम्) बड़बड़ाहट है (इति) इस प्रकार। वृद्धजनोपदेशम्=वृद्धों के उपदेश को। पश्यन्ति=देखते हैं। आत्मप्रज्ञापरिभवः=(आत्म) अपनी (प्रज्ञा) बुद्धि का (परिभवः) तिरस्कार है। इति=इस प्रकार। सचिवोपदेशाय=मन्त्रियों की शिक्षा से। असूयन्ति=ईर्ष्या करते हैं। हितवादिने=कल्याणकारी बोलने वालों पर। कुप्यन्ति=क्रोध करते हैं।

अनुवाद -

'व्यर्थ का परिश्रम करके (ये) विषय-भोग के सुखों से वंचित रहते हैं' -इस प्रकार विद्वानों का उपहास करते हैं। 'बुढ़ापे की बेचैनी का प्रलाप है' इस प्रकार वृद्धों के उपदेश को देखते है। (समझते हैं)। 'हमारी बुद्धि का तिरस्कार है' इस प्रकार मन्त्रियों के परामर्श से ईर्ष्या करते हैं। हित की बात कहने वालों पर क्रोध करते हैं।

संस्कृत-टीका- (भा॰च॰सि॰च॰ टीका)-

अनर्थकेति। अनर्थको निष्फलो य आयासः प्रयासः श्रौतस्मार्तकर्मणि क्लेशस्तेनान्तरितं व्यवहितमुपभोगोऽङ्गनादिकस्तज्जनितं सुखं सातं यस्येति कृत्वा विद्वज्जनं विबुधज्जनमुपहसन्त्युपहासं कुर्वन्ति। जरेति। जरा विस्रसा तस्यावैक्लव्यं विकलता तेन प्रलपितं जल्पितमिति कृत्वा वृद्धानां स्थविराणामुपदेशं शिक्षां पश्यन्ति। जानन्तीत्यर्थः। आत्मेति। आत्मनः स्वस्य याप्रज्ञा बुद्धिस्तस्याः परिभवः पराभव इति कृत्वा सचिवोपदेशाय प्रधानशिक्षाया असूयन्त्यसूयां कुर्वन्ति। हितेति। हितवादिने कुप्यन्ति कोपं कुर्वन्ति। सचिवोपदेशाय हितवादिने इति चतुर्थीद्वयमपि 'क्रुधद्रुह- 'इत्यादिना सम्प्रदानसंज्ञायां सत्यां ज्ञेयम्।

व्याकरणात्मक विशेषातायें -

1. अनर्थकायासान्तरितविषयोपभोगसुखम्- अनर्थकश्च आयासश्च इति कर्म॰। उपभोगस्य सुखमिति ष॰तत्पु॰। अनर्थकायासेन अन्तरितम् उपभोगसुखं येन तम् इति बहु॰।
2. विद्वज्जनम्-विद्वाँश्चासौ जनः इति कर्म॰तम्।
3. जरावैक्लव्यप्रलपितम्- जरसः वैक्लव्यं जरावैक्लव्यम् इति ष॰तत्पु॰ तेन प्रलपितमिति इति तृ॰तत्पु॰।
4. वृद्धजनोपदेशम्-वृद्धाश्च ते जनाश्च इति कर्म॰। तेषाम् उपदेशः इति ष॰तत्पु॰। तम्।
5. आत्मप्रज्ञापरिभवः- आत्मनः प्रज्ञा इति ष॰तत्पु॰। तस्याः परिभवः इति ष॰तत्पु॰।
6. असूयन्ति- √असूय् लट् ल॰प्र॰पु॰ब॰व॰।
7. सचिवोपदेशाय- सचिवानाम् उपदेशाः इति ष॰तत्पु॰। तस्मै। 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (अष्टा॰ 1.4.37) से च॰वि॰ का प्रयोग।
8. कुप्यन्ति- √कुप् क्रोधे लट् ल॰प्र॰पु॰ब॰व॰।
9. हितवादिने- हितं वदति यः तस्मै। √वद्+णिनि च॰वि॰ए॰व॰।

सर्वथा तमभिनन्दन्ति तमालपन्ति तं पार्श्वे कुर्वन्ति तं सवर्द्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तस्मै ददति तं मित्रताम् उपनयन्ति, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, तं बहु मन्यन्ते, तमाप्ततामापादयन्ति योऽहर्निशमनवरतमुपरचिताञ्जलिर- धिदैवतमिव विगतान्यकर्त्तव्यः स्तौति यो वा माहात्म्यमुद्भावयति।

शब्दार्थ -

तम्=उस (मनुष्य) का। सर्वथा=सब प्रकार से। अभिनन्दन्ति=सत्कार करते

हैं। तम्=उससे। आलपन्ति=वार्तालाप करते हैं। तं=उसको। पार्श्वे=समीप में। कुर्वन्ति=रखते हैं। संवर्धयन्ति=बढ़ाते हैं (उन्नति कराते हैं)। तेन=उसके। सह=साथ। सुखम्=सुखपूर्वक। अवतिष्ठन्ते=बैठते हैं। तस्मै=उसके लिए। ददति=देते हैं। तं=उसकी। मित्रताम्=मित्रता को। उपनयन्ति=(दृढ़) स्थापित करते हैं। तस्य=उसके। वचनं=वचन को। शृण्वन्ति=सुनते हैं। तत्र=उस पर। वर्षन्ति=(धन की) वर्षा करते हैं। बहु=अधिक। मन्यन्ते=मानते हैं। आप्तताम्=प्रामाण्य (विश्वस्तता) को। आपादयन्ति=प्राप्त करते हैं। यः=जो। विगतान्यकर्त्तव्यः=दूसरे कर्त्तव्यों को छोड़कर। अहर्निशम्=दिन रात। अनवरतम्=लगातार। उपरचिताञ्जलिः=हाथ जोड़े हुए। अधिदैवतमिव=इष्ट देव के समान। स्तौति=स्तुति करता है। वा=अथवा। यो=जो। माहात्म्यम्=महिमा को। उद्भावयति=प्रकट करता है।

अनुवाद -

(वे राजा लोग) उस (व्यक्ति) का सब प्रकार से सत्कार करते हैं, उससे बातचीत करते हैं, उसको बगल में रखते हैं, उसे बढ़ाते हैं, उसके साथ सुखपूर्वक बैठते हैं, उसको देते हैं, उसके साथ मित्रता को प्राप्त करते हैं, उसके वचनों को सुनते हैं, उस पर वर्षा करते हैं, उसे बहुत मानते हैं (सम्मान करते हैं), उसकी विश्वस्तता को प्राप्त करते हैं, जो दिनरात निरन्तर दूसरे कर्त्तव्यों को छोड़े हुए, हाथ जोड़कर (उनकी) इष्टदेवता को समान स्तुति करता है अथवा जो महिमा को प्रकट करता है।

संस्कृत-टीका- (भा०च०सि०च० टीका)

एतादृशं पुरुषं सर्वथा स्तुवन्तीत्याशयेनाहतमिति। तं पुरुषं सर्वथा सर्वप्रकारेणाभिनन्दन्ति प्रशंसन्ति। तमालपन्त्यालापं कुर्वन्ति। तं पुरुषं पार्श्वे समीपे कुर्वन्ति रक्षन्ति। तं सम्वर्धयन्ति वृद्धिं प्रापयन्ति। तेनेति। तेन पुरुषेण सह सुखं यथा स्यात्तथावतिष्ठन्तेऽवस्थानं कुर्वन्ति। तस्मायिति। तस्मैपुरुषाय ददति प्रयच्छन्ति। तमिति। तं पुरुषं प्रति मित्रतां सुहृद्भावतामुपजनयन्ति निष्पादयन्ति। तस्येति। तस्य-पुरुषस्य वचनं वाक्यं शृण्वन्ति। तत्रेति। तस्मिन्पुंसि वर्षन्ति पुनः पुनः प्रदानं कुर्वन्ति तं पुरुषं बहु मन्यन्ते। अत्युत्कृष्टतया जानन्तीत्यर्थः। तमिति। तं प्रत्याप्ततां शिष्टतामापादयन्ति प्रतिपादयन्ति। तच्छब्दस्य यच्छब्दसापेक्षत्वाहदाह-य इति। यः पुमानहर्निशमहोरात्रं अनवरतं निरन्तरं विगतमन्यकर्त्तव्यं यस्यैवंभूत उपरचिताञ्जलिः संयोजित करपुटोऽधिदैवतमिवेष्टदेवतामिव स्तौति नवीति। यो वेति। यो माहात्म्यं तद्गुणवर्णना- लक्षणमुद्भावयत्युद्भावनां करोति।

व्याकरणात्मक विशेषतायें -

1. अभिनन्दन्ति-अभि उप० √नन्द् समृद्धौ लट् ल०प्र०पु०ब०व०।

2. आलपन्ति-आ √लप् व्यक्तायां वाचि लट् ल०प्र०पु०ब०व०।
3. सम्वर्द्धयन्ति- सम् √वृध् वृद्धौ णिच् लट् ल०प्र०पु०ब०व०।
4. अवतिष्ठन्ते- अव √स्था गतिनिवृद्धौ लट् ल०प्र०पु०ब०व०।
5. तस्मै ददति- √दा दाने लट् ल०प्र०पु०ब०व०। 'चतुर्थी सम्प्रदाने' (अष्टा० 2. 3.13) से √दा के योग में 'तस्मै' में चतुर्थी विभक्ति का प्रयोग है।
6. उपजनयन्ति- उप √जन् प्रादुर्भावो णिच् लट् ल०प्र०पु०ब०व०।
7. आप्तताम्- √आप् लम्भने+क्त+तल्+टाप् द्वि०वि०ए०व०।
8. आपादयन्ति- आङ् √पद् गतौ णिच् लट् ल०प्र०पु०ब०व०।
9. अहर्निशम्- अहश्च- निशा च इति द्वन्द्व तत्पु०।
10. उपरचिताञ्जलिः- उपरचिता अञ्जलिः येन सः इति बहु०।
11. विगतान्यकर्त्तव्यः- विगतम् अन्यत् कर्त्तव्यं यस्य येन वा सः इति बहु०।

विशेष - अधिदैवतमिव में उपमा अलंकार है।

किं वा तेषां साम्प्रतं येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचारक्रियाक्रूरैकप्रकृतयःपुरोधसो गुरवः, पराभिसन्धानपरा मन्त्रिण उपदेष्टारः, नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिः, मारणात्मकेषु शास्त्रेष्वभियोगः सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः।

शब्दार्थ -

वा=अथवा। तेषां=उन (राजाओं) का। किं=क्या। साम्प्रतम्=उचित है। येषां=जिनका। अतिनृशंसप्रायोपदेशनिर्घृणं=('अति) बहुत अधिक (नृशंसप्राय) कठोरतापूर्ण (उपदेश) शिक्षा से (निर्घृणं) निर्दय (दयाशून्य)। कौटिल्यशास्त्रं=चाणक्यनीतिशास्त्र। प्रमाणम्=प्रमाण है। अभिचारक्रियाक्रूरैकप्रकृतयः= (अभिचार) (मारणोच्चाटन आदि) अभिचार (क्रिया) क्रियाओं से (एक) एकमात्र (नितान्त) (क्रूर) नृशंस (प्रकृतयः) प्रकृति वाले। पुरोधसो=पुरोहित। गुरवः=आचार्य हैं। पराभिसन्धानपरा=(पर) दूसरों को (अभिसन्धान) धोखा देने में (ठगने में) (परा) लीन (लगे हुए)। मन्त्रिण=सचिव। उपदेष्टारः=उपदेशक हैं। नरपतिसहस्रभुक्तो- ज्झितायां=(सहस्र) हजारों (नरपति) राजाओं द्वारा (भुक्त) भोगकर (उज्झिता) छोड़ी गयी। लक्ष्म्यां लक्ष्मी में (जिनकी) आसक्तिः= आसिक्त है। मारणात्मकेषु=संहारक। 'शास्त्रेषु=शास्त्रों में (जिनका)। अभियोगः=अभिनिवेश है। सहजप्रेमार्द्रहृदयानुरक्ता=(सहज) स्वाभाविक (प्रेम) स्नेह (से) (आर्द्र) द्रवीभूत (हृदय) मन से (अनुरक्ता) प्रेम करने वाले। भ्रातर=भाई। (जिनके द्वारा) उच्छेद्याः=समूल नष्ट करने योग्य हैं।

अनुवाद -

अथवा उन (राजाओं) का क्या (कार्य) उचित है जिनका अत्यन्त नृशंसतापूर्ण उपदेश के कारण दयाशून्य चाणक्यनीतिशास्त्र प्रमाण है, अभिचार क्रियाओं से एकमात्र क्रूर स्वभाव वाले पुरोहित जिनके गुरु हैं, दूसरों को धोखा देने में लीन रहने वाले मंत्री (जिनके) उपदेशक हैं, हजारों राजाओं द्वारा उपभोग करके त्यागी हुयी लक्ष्मी में जिनकी आसक्ति है, संहारक शास्त्रों में जिनका अभिनिवेश (व्यसन) है और स्वाभाविक स्नेह से द्रवीभूत हृदय से अनुराग करने वाले (सगे) भाई (जिनके लिए) समूल नष्ट करने योग्य हैं।

टिप्पणी -

प्रस्तुत अनुच्छेद में 'साम्प्रतं' शब्द का प्रयोग 'उचित' के अर्थ में हुआ है- 'युक्ते द्वे साम्प्रतं स्थाने' (अमर०) यहाँ पर कौटिल्य अर्थशास्त्र' नामक 'नीतिशास्त्र' को निर्घृण शास्त्र की संज्ञा दी गयी है। "गुप्तयुग में कौटिल्य शास्त्र का अत्यधिक प्रचार था। दण्डी ने उसका उल्लेख किया है और उसके कुछ सन्दर्भों का उद्धरण भी दिया है। कामन्दक नीति-शास्त्र उसी पर आधारित था। उसी युग में विरचित याज्ञवल्क्य-स्मृति में भी उसकी सामग्री से लाभ उठाया गया है।' (काद०सां०अ०, पृ० 128)। श्येनयाग आदि वैदिक कर्मानुष्ठान से या तंत्रोक्त विधि से मारण आदि के प्रयोग की क्रिया अभिचार क्रिया कहलाती है। प्राचीनकाल में मंत्रिमण्डल के दस मन्त्रियों में से एक को 'पुरोधस्' कहा जाता था। वह अथर्ववेद तथा अभिचार-क्रियाओं का पूर्ण ज्ञाता होता था। ऐसे व्यक्तियों के शिक्षक होने में बाण द्वारा अनास्था प्रकट की गयी है। जिन मंत्रियों का काम ही दूसरों को ठगना या धोखा देना हो, वे राजा को किसी हितकारी कार्य का परामर्श दे ही नहीं सकते। इस प्रकार के राजाओं के सभी कार्य अन्याय से युक्त होते हैं।

संस्कृत-टीका- (भा०च०सि०च० टीका)

विभूतिमतां पुनर्दोषान्तरमाह किं वेति। तेषां विभूतिमतां वाथवा किं सांप्रतं युक्तं येषां विभूतिमतामतिनृशंसप्रायोऽतिनिस्त्रिंशबहुल उपदेशः शिक्षा निर्गता घृणा दया यस्मादेतादृशं कौटिल्यशास्त्रं यामलादि प्रमाणमिति। अभिचारक्रिया कृत्याप्रतिकृत्यादिरूपक्रिया। क्रूरेति। क्रूरा मिस्त्रिंशैकद्वितीया प्रकृतिः स्वभावो येषामेवंविधाः पुरोधसः पुरोहिता गुरवो धर्मोपदेशकाः। परेषामितरेषामभिसन्धानं निरोधस्तत्र परास्तत्परा मन्त्रिणः सचिवा। उपदेष्टारः शिक्षादायकाः। नरेति। नरपतीनां यत्सहस्रं तेन भुक्ता चासावुज्झिता त्यक्ता चेति कर्मधारयः। एवंविधायां लक्ष्म्यामासाक्तिः प्रेमाधिक्यम्। मारणेति। मारणं व्यापादनं तदेवात्मा स्वरूपं येषां तथाविधेषु शस्त्रेष्वभियोग उद्यमः। सहेति। सहजं स्वाभाविकं यत्प्रेम तेनार्द्रं स्विन्नं हृदयं येषामत एवानुरक्ता

एतादृशा भ्रातरः सहोदरा उच्छेद्याः मूलतः उन्मूलनीयाः।

व्याकरणात्मक विशेषतायें -

1. अतिनृशंसप्रायोपदेशनिर्घृणम्-निर्गता घृणा यस्मात् तत् इति अव्ययी०। अतिनृशंसप्रायेण उपदेशेन निर्घृणमिति तृ०तत्पु०। कौटिल्यशास्त्रं पद का विशेषण।
2. अभिचारक्रियाक्रूरैकप्रकृतयः- अभिचारस्य क्रिया इति ष०तत्पु०। अभिचारक्रियया क्रूरा एका प्रकृतिः येषां ते इति बहु०। पुरोधसः पद का विशेषण।
3. पराभिसन्धानपराः- परेषाम् अभिसन्धानम् इति ष०तत्पु०। तस्मिन् पराः इति स०तत्पु०। मन्त्रिणः पद का विशेषण।
4. उपदेष्टारः- उप √दिश्+तृच् प्र०वि०ब०व। मन्त्रिणः पद का विशेषण।
5. नरपतिसहस्रभुक्तोज्झितायाम्- नरपतीनां सहस्रम् इति ष०तत्पु०। पूर्वं भुक्ता पश्चात् उज्झिता इति कर्म०। नरपतिसहस्रेण भुक्तोज्झिता इति तृ०तत्पु०। तस्याम्। लक्ष्म्यां पद का विशेषण।
6. आसक्तिः आ √सञ्ज्+क्तिन् प्र०वि०ए०व०।
7. मारणात्मकेषु- मारणम् एव आत्मा येषां तेषु इति बहु०।
8. अभियोगः- अभि√युज् योगे संयमने+घञ् 'अभियोगस्त्वभिग्रहः' (अमर०) अर्थात् साग्रह प्रयत्न।
9. सहजप्रेमार्द्रहृदयानुरक्ताः- सहजं प्रेम इति सहजप्रेम इति कर्म०। सहजप्रेम्णा आर्द्रं हृदयम् इति तृ०तत्पु०। तेन अनुरक्ताः इति तृ०तत्पु०। भ्रातरः पद का विशेषण।
10. उच्छेद्याः- उत् √छिद्+यत् प्र०वि०ब०व०।

विशेष - समुच्चय अलंकार है।

तदेवंप्रायेऽतिकुटिलकष्टचेष्टासहस्रदारुणेराज्यतन्त्रे, अस्मिन् महामोहान्धकारिणि च यौवने, कुमार! तथा प्रयतेथा यथा नोपहस्यसे जनैर्न निन्द्यसे साधुभिर्न धिक्क्रियसे गुरुभिर्नोपालभ्यसे सुहृद्भिर्न शोच्यसे विद्वभिः।

शब्दार्थ -

तत्=इस कारण। एवंप्राये=इस प्रकार के (पूर्वोक्त स्वरूप वाले)। सहस्र=हजारों। अतिकुटिल=अत्यन्त वक्र। कष्ट=दुखदायी । चेष्टा=क्रियाओं से। दारुणे=भीषण। राज्यतन्त्रे=शासन तन्त्र में। च=और। अस्मिन्=इस। महामोहान्धकारिणी=(महा) बहुत अधिक (मोह) अज्ञान से (अन्धकारिणी) अन्धा कर देने वाले अर्थात् विवेकशून्य बनाने वाले। यौवने=तारुण्य में। कुमार=हे चन्द्रापीड। तथा=उस प्रकार से। प्रयतेथा=प्रयत्न करना चाहिए। यथा=जिससे। जनैः=लोगों के द्वारा। (तुम) न

अनुवाद -

अथवा उन (राजाओं) का क्या (कार्य) उचित है जिनका अत्यन्त नृशंसतापूर्ण उपदेश के कारण दयाशून्य चाणक्यनीतिशास्त्र प्रमाण है, अभिचार क्रियाओं से एकमात्र क्रूर स्वभाव वाले पुरोहित जिनके गुरु हैं, दूसरों को धोखा देने में लीन रहने वाले मंत्री (जिनके) उपदेशक हैं, हजारों राजाओं द्वारा उपभोग करके त्यागी हुयी लक्ष्मी में जिनकी आसक्ति है, संहारक शास्त्रों में जिनका अभिनिवेश (व्यसन) है और स्वाभाविक स्नेह से द्रवीभूत हृदय से अनुराग करने वाले (सगे) भाई (जिनके लिए) समूल नष्ट करने योग्य हैं।

टिप्पणी -

प्रस्तुत अनुच्छेद में 'साम्प्रतं' शब्द का प्रयोग 'उचित' के अर्थ में हुआ है- 'युक्ते द्वे साम्प्रतं स्थाने' (अमर०) यहाँ पर कौटिल्य अर्थशास्त्र' नामक 'नीतिशास्त्र' को निर्घृण शास्त्र की संज्ञा दी गयी है। "गुप्तयुग में कौटिल्य शास्त्र का अत्यधिक प्रचार था। दण्डी ने उसका उल्लेख किया है और उसके कुछ सन्दर्भों का उद्धरण भी दिया है। कामन्दक नीति-शास्त्र उसी पर आधारित था। उसी युग में विरचित याज्ञवल्क्य-स्मृति में भी उसकी सामग्री से लाभ उठाया गया है।' (काद०सां०अ०, पृ० 128)। श्येनयाग आदि वैदिक कर्मानुष्ठान से या तंत्रोक्त विधि से मारण आदि के प्रयोग की क्रिया अभिचार क्रिया कहलाती है। प्राचीनकाल में मंत्रिमण्डल के दस मन्त्रियों में से एक को 'पुरोधस्' कहा जाता था। वह अथर्ववेद तथा अभिचार-क्रियाओं का पूर्ण ज्ञाता होता था। ऐसे व्यक्तियों के शिक्षक होने में बाण द्वारा अनास्था प्रकट की गयी है। जिन मंत्रियों का काम ही दूसरों को ठगना या धोखा देना हो, वे राजा को किसी हितकारी कार्य का परामर्श दे ही नहीं सकते। इस प्रकार के राजाओं के सभी कार्य अन्याय से युक्त होते हैं।

संस्कृत-टीका- (भा०च०सि०च० टीका)

विभूतिमतां पुनर्दोषान्तरमाह किं वेति। तेषां विभूतिमतां वाथवा किं सांप्रतं युक्तं येषां विभूतिमतामतिनृशंसप्रायोऽतिनिस्त्रिंशबहुल उपदेशः शिक्षा निर्गता घृणा दया यस्मादेतादृशं कौटिल्यशास्त्रं यामलादि प्रमाणमिति। अभिचारक्रिया कृत्याप्रतिकृत्यादिरूपक्रिया। क्रूरेति। क्रूरा मिस्त्रिंशैकद्वितीया प्रकृतिः स्वभावो येषामेवंविधाः पुरोधसः पुरोहिता गुरवो धर्मोपदेशकाः। परेषामितरेषामभिसन्धानं निरोधस्तत्र परास्तत्परा मन्त्रिणः सचिवा। उपदेष्टारः शिक्षादायकाः। नरेति। नरपतीनां यत्सहस्रं तेन भुक्ता चासावुज्झिता त्यक्ता चेति कर्मधारयः। एवंविधायां लक्ष्म्यामासाक्तिः प्रेमाधिक्यम्। मारणेति। मारणं व्यापादनं तदेवात्मा स्वरूपं येषां तथाविधेषु शस्त्रेष्वभियोग उद्यमः। सहेति। सहजं स्वाभाविकं यत्प्रेम तेनार्द्रं स्विन्नं हृदयं येषामत एवानुरक्ता

एतादृशा भ्रातरः सहोदरा उच्छेद्याः मूलतः उन्मूलनीयाः।

व्याकरणात्मक विशेषतायें -

1. अतिनृशंसप्रायोपदेशनिर्घृणम्-निर्गता घृणा यस्मात् तत् इति अव्ययी०। अतिनृशंसप्रायेण उपदेशेन निर्घृणमिति तृ०तत्पु०। कौटिल्यशास्त्रं पद का विशेषण।
2. अभिचारक्रियाक्रूरैकप्रकृतयः- अभिचारस्य क्रिया इति ष०तत्पु०। अभिचारक्रियया क्रूरा एका प्रकृतिः येषां ते इति बहु०। पुरोधसः पद का विशेषण।
3. पराभिसन्धानपराः- परेषाम् अभिसन्धानम् इति ष०तत्पु०। तस्मिन् पराः इति स०तत्पु०। मन्त्रिणः पद का विशेषण।
4. उपदेष्टारः- उप √दिश्+तृच् प्र०वि०ब०व। मन्त्रिणः पद का विशेषण।
5. नरपतिसहस्रभुक्तोज्झितायाम्- नरपतीनां सहस्रम् इति ष०तत्पु०। पूर्वं भुक्ता पश्चात् उज्झिता इति कर्म०। नरपतिसहस्रेण भुक्तोज्झिता इति तृ०तत्पु०। तस्याम्। लक्ष्म्यां पद का विशेषण।
6. आसक्तिः आ √सञ्ज्+क्तिन् प्र०वि०ए०व०।
7. मारणात्मकेषु- मारणम् एव आत्मा येषां तेषु इति बहु०।
8. अभियोगः- अभि√युज् योगे संयमने+घञ् 'अभियोगस्त्वभिग्रहः' (अमर०) अर्थात् साग्रह प्रयत्न।
9. सहजप्रेमार्द्रहृदयानुरक्ताः- सहजं प्रेम इति सहजप्रेम इति कर्म०। सहजप्रेम्णा आर्द्रं हृदयम् इति तृ०तत्पु०। तेन अनुरक्ताः इति तृ०तत्पु०। भ्रातरः पद का विशेषण।
10. उच्छेद्याः- उत् √छिद्+यत् प्र०वि०ब०व०।

विशेष - समुच्चय अलंकार है।

तदेवंप्रायेऽतिकुटिलकष्टचेष्टासहस्रदारुणेराज्यतन्त्रे, अस्मिन् महामोहान्धकारिणि च यौवने, कुमार! तथा प्रयतेथा यथा नोपहस्यसे जनैर्न निन्द्यसे साधुभिर्न धिक्क्रियसे गुरुभिर्नोपालभ्यसे सुहृद्भिर्न शोच्यसे विद्वद्भिः।

शब्दार्थ -

तत्=इस कारण। एवंप्राये=इस प्रकार के (पूर्वोक्त स्वरूप वाले)। सहस्र=हजारों। अतिकुटिल=अत्यन्त वक्र। कष्ट=दुखदायी । चेष्टा=क्रियाओं से। दारुणे=भीषण। राज्यतन्त्रे=शासन तन्त्र में। च=और। अस्मिन्=इस। महामोहान्धकारिणी=(महा) बहुत अधिक (मोह) अज्ञान से (अन्धकारिणी) अन्धा कर देने वाले अर्थात् विवेकशून्य बनाने वाले। यौवने=तारुण्य में। कुमार=हे चन्द्रापीड। तथा=उस प्रकार से। प्रयतेथा=प्रयत्न करना चाहिए। यथा=जिससे। जनैः=लोगों के द्वारा। (तुम) न

उपहस्यसे=उपहास का विषय न बनाये जाओ। साधुभिः=सज्जनों के द्वारा। न निन्द्यसे=निन्दित न किये जाओ। गुरुभिः=आचार्यों के द्वारा। न धिक्क्रियसे=धिक्कारे न जाओ। सुहृद्भिः=मित्रों के द्वारा। न उपालभ्यसे=उपालम्भ (उलाहनों) के विषय न बनाये जाओ। विद्वद्भिः=विद्वानों के द्वारा। न शोच्यसे=शोक के विषय न बनाये जाओ।

अनुवाद -

इसलिए हे चन्द्रापीड। ऐसे हजारों अत्यंत कुटिल एवं कष्टदायक क्रियाओं से भयंकर शासन-तन्त्र (राज-काज) में और भारी मोह के कारण विवेकहीन बनाने वाले इस यौवन में ऐसा प्रयत्न करो जिससे लोग तुम्हारा उपहास न करें, सज्जन पुरुष निन्दा न करें, गुरुजन न धिक्कारें, मित्र उलाहना न दें, (और) विद्वान शोक न करें।

टिप्पणी -

प्रस्तुत अनुच्छेद में 'नोपहस्यसे जनैः' आदि में क्रियापद कर्मवाच्य के अनुसार हैं, परन्तु हिन्दी अनुवाद में कर्तृवाच्य के अनुसार ही प्रयोग उचित एवं सुविधाजनक प्रतीत होता है। यहाँ शुकनास के कहने का तात्पर्य यह है कि राज्यलक्ष्मी एवं यौवन के होने पर भी अपने व्यवहार को हर प्रकार से संतुलित करने का प्रयास किया जाना चाहिए।

संस्कृत-टीका- (भा०च०सि०च० टीका)

प्रकृतमुपसंहरन्नाह- तदेवमिति। तदितिहेत्वर्थे एवम्प्राये पूर्वोक्तस्वरूपबहुले। अतीति। अतिकुटिला अतिवक्राः कष्टदायिन्याश्चेष्टाः कायव्यापारास्तासां सहस्रं तेन दारुणे भीषणे। राज्यतन्त्र इति। राज्यस्य तन्त्रं इतिकर्त्तव्यता। 'इतिकर्त्तव्यता तन्त्रे' इत्यनेकार्थः। अस्मिन्ननुभूयमाने यौवने तारुण्ये च महामोहकारिणि महामौढयजनके। कुमारेति सम्बोधनं। तथेति। तेनैव प्रकारेण प्रयतेथाः प्रयत्नं कृथाः। यथा येन प्रकारेण कर्मैर्लोकैर्भवांस्त्वं नोपहस्यसे न उपहासविषयीक्रियसे। साधुभिः सज्जनैर्न निन्द्यसे न निन्दाविषयीक्रियसे। गुरुभिर्धर्माचार्यैर्न धिक्क्रियसे न धिग्जीवितभित्यादिवाक्यगोचरीक्रियसे सुहृद्भिर्मित्रैर्नोपालभ्यसे नोपालम्भविषयीक्रियसे। विद्वद्भिः पण्डितैर्न शोच्यसे न शोकविषयीक्रियसे।

व्याकरणातमक विशेषतायें -

1. अतिकुटिलकष्टचेष्टासहस्रदारुणे- अतिशयेन कुटिलः इति कर्म०। कष्टानां चेष्टानां सहस्रम् इति ष०तत्पु०। अतिकुटिलेन कष्टचेष्टासहस्रेण दारुणे इति तृ०तत्पु०। 'राज्यतन्त्रे' का विशेषण।
2. राज्यतन्त्रे-राज्यस्य तन्त्रे इति ष०तत्पु०।

3. महामोहान्धकारिणि- महाश्चासौ मोहश्च इति कर्म०। महामोहेन अन्धं कर्तुं शीलं यस्य इति बहु० तस्मिन्। 'यौवने' पद का विशेषण।
4. प्रयतेथाः - प्र √यत् विधिलिङ्ग म०पु०ए०व०।
5. उपहस्यसे- उप √हस्+यक् लट् ल०म०पु०ए०व०।
6. निन्द्यसे- √निन्द्+यक् लट् ल०म०पु०ए०व०।
7. धिक्क्रियसे- √धिक्+डुकृञ्+यक् लट् ल०म०पु०ए०व०।
8. उपालभ्यसे- उप+आङ् √लभ्+यक् लट् ल०म०पु०ए०व०।
9. शोच्यसे- √शुच् शोके+यक् लट् ल०म०पु०ए०व०।

यथा च न प्रकाश्यसे विटैर्न प्रहस्यसे कुशलैर्नास्वाद्यसे भुजङ्गैर्नावलुप्यसे सेवकवृकैर्न वञ्चयसे धूर्तैर्न प्रलोभ्यसे वनिताभिर्न विडम्ब्यसे लक्ष्म्या न नर्त्य से मदेन नोन्मत्तीक्रियसे मदनेन नाक्षिप्यसे विषयैर्नावकृष्यसे रागेण नापह्रियसे सुखेन।

शब्दार्थ -

च=और। यथा=जिस प्रकार। विटैः=कामुकजनों के द्वारा। न प्रकाश्यसे=प्रकाशित न किये जाओ। कुशलैः=चतुर लोगों द्वारा। न प्रहस्यसे=उपहास का विषय न बनाये जाओ। भुजङ्गैः=लम्पटों द्वारा (वेश्याओं में आसक्त रहने वाले)। नास्वाद्यसे=उपभोग न किये जाओ। सेवकवृकैः=सेवक रूपी भेड़ियों के द्वारा। नावलुप्यसे=नष्ट न कर दिये जाओ। धूर्तैः=धूर्तों के द्वारा। न वञ्चयसे=न ठगे जाओ। वनिताभिः=कामिनियों द्वारा। न प्रलोभ्यसे=न लुभाये जाओ। लक्ष्म्या=लक्ष्मी के द्वारा। न विडम्ब्यसे=विडम्बना के पात्र न बनो। मदेन=अभिमान के द्वारा। न नर्त्यसे=न नचाये जाओ। मदनेन=कामदेव के द्वारा। नोन्मत्तीक्रियसे=उन्मत्त न बनाये जाओ। विषयैः=विषय भोगों द्वारा। नाक्षिप्यसे=विक्षिप्त न किये जाओ। रागेण=आसक्ति के द्वारा। नावकृष्यसे=खींचे न जाओ (आकृष्ट न किये जाओ)। सुखेन=सुख द्वारा (आनन्द द्वारा)। नापह्रियसे=न त्यागे जाओ।

अनुवाद -

और जिससे (तुम्हें) कामुकजन प्रकाशित न करें (अर्थात् अपने जैसा न बतायें), चतुर लोग हँसी न उड़ायें, (वेश्या के साथ) लम्पट (तुम्हार।) उपभोग न करें, सेवक रूपी भेड़िये नष्ट न कर दें, धूर्त लोग ठग न लें, कामिनियाँ लुभान लें। लक्ष्मी विडम्बना का पात्र न बना ले, अभिमान न नचाये, कामदेव उन्मत्त न बनाये, विषय भोग विक्षिप्त न कर दें, आसक्ति आकृष्ट न कर ले और आनन्द छोड़ न दें।

टिप्पणी -

वेश्याओं को आश्रय देने वाले लोग 'भुजङ्ग' कहलाते हैं और वेश्याओं के माध्यम से धनी लोगों और राजाओं का धन हड़प लेते हैं इसलिए उनसे सतर्क रहने को कहा गया है। विटजनों द्वारा प्रकाशित किये जाने का भाव यह है कि जो राजा इस प्रकार के लोगों की संगति में रहते हैं उन्हें वही लोग प्रजा के समक्ष एवं आपत्तिकाल में 'तुम भी तो ऐसे ही हो' इस प्रकार कहकर लज्जित करते हैं। ऐसा अवसर ही नहीं आने देना चाहिए। 'विट' अर्थात् असत् आचरण करने वाले अथवा कामुक पुरुष। योग्य प्रजापालक न होने पर चतुर लोग उपहास करते हैं अतः इस राज्यतंत्र में योजनाबद्ध रूप से कार्य किया जाना चाहिए जिससे कुशलजन हँसी न उड़ायें। जिस प्रकार भेड़िया छिपकर अपना शिकार करता है उसी तरह धूर्त लोग सेवक के रूप में छिपकर धन का अपहरण न कर लें इस प्रकार कार्य करना चाहिए।

संस्कृत-टीका- (भा॰च॰सि॰च॰ टीका)

यथा विटैरसदाचरणकारिभिर्न प्रकाश्यसे न प्रकटीक्रियसे। कुशलैरनाचारादिभिर्न प्रतार्यसे न प्रतारणविषयीक्रियसे भुजङ्गैर्गणिका-पतिभिर्नास्वाद्यसे गणिकार्थं द्रव्यवितरणद्वारा नोपभोज्यसे। सेवकाः सपर्याकारिण एव वृका इहामृगास्तैर्नावलुप्यसे नानिष्टे प्रसज्यसे। नाकुलीक्रियसे इत्यर्थः। धूर्तैः शठैर्न वञ्चयसे न प्रतार्यसे। वनिताभिः स्त्रीभिर्न प्रलोभ्यसे न प्रलोभनविषयः क्रियसे। लक्ष्म्या श्रिया न विडम्ब्यसे न विडम्बनायुक्तः क्रियसे। न परित्यज्यसे इत्यर्थः। मदेनाधिपत्यजनिताहङ्कारेण न नर्त्यसे न नृत्यं कार्यसे। मदनेन मनोभवेन न उन्मत्तीक्रियसे न चित्तविप्लवतामापद्यसे। विषयैरिन्द्रियार्थैर्नाक्षिप्यसे न प्रेर्यसे। रागेण स्नेहादिना न विकृष्यसे नाकृष्यसे। सुखेन सातेन नापह्रियसे न परित्यज्यसे।

व्याकरणात्मक विशेषतायें -

1. प्रकाश्यसे- प्र√काश् दीप्तौ+यक् लट् ल॰म॰पु॰ए॰व॰।
2. प्रतार्यसे- प्र √तृ णिच् यक् लट् ल॰म॰पु॰ए॰व॰।
3. कुशलैः- कुशल पद तृ॰वि॰ब॰व॰। कहीं-कहीं 'अकुशलैः' पाठ मिलता है, परन्तु वहाँ पर अर्थ समीचीन नहीं बनता।
4. सेवकवृकैः- सेवकाः एव वृकाः इति कर्म॰। तैः।
5. अवलुप्यसे- अव √लुप् विमोहने+यक् लट् ल॰म॰पु॰ए॰व॰।
6. इसी प्रकार √वञ्च्+यक्, आङ् √क्षिप्+यक्, अव √कृष्+यक् तथा अप √हृ+यक् आदि से वञ्चयसे, आक्षिप्यसे, अवकृष्यसे तथा अपह्रियसे आदि रूप बने हैं लट् ल॰म॰पु॰ए॰व॰।

कामं भवान् प्रकृत्यैव धीरः। पित्रा च महता प्रयत्नेन समारोपितसंस्कारः। तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्।

शब्दार्थ -

कामं=यद्यपि। भवान्=आप। प्रकृत्या=स्वभाव से। एव=ही। धीरः=धैर्यशाली (हैं)। च=और। पित्रा=पिता के द्वारा। महता=अत्यन्त। प्रयत्नेन=प्रयास से। समारोपित-संस्कारः=सुसंस्कृत (संस्कारयुक्त) किये गये हो। धनानि=सम्पत्तियां। तरलहृदयम्=चञ्चल मन वाले। च=और। अप्रतिबुद्धम्=अजागरूक को। मदयन्ति=उन्मत्त करती हैं। तथापि=फिर भी (उपदेश की आवश्यकता न होते हुए भी)। भवद्गुणसन्तोषो=(भवद्) आपके (गुण) गुणों से (उत्पन्न) (सन्तोषो) सन्तुष्टि ने। माम्=मुझ (शुकनास) को। एवं=इतना (इस प्रकार का)। मुखरीकृतवान्=वाचाल (बोलने वाला) कर दिया।

अनुवाद -

यद्यपि आप स्वभाव से ही धैर्यशाली हैं। और पिता ने महान प्रयत्न से तुममें संस्कार डाले हैं। सम्पत्तियां चञ्चल मन वाले और अजागरूक व्यक्ति को ही उन्मत्त बनाती हैं। फिर भी आपके गुणों से उत्पन्न सन्तोष ने ही मुझे इस प्रकार वाचाल (अधिक बोलने के लिए प्रेरित) कर दिया।

टिप्पणी -

हिन्दू धर्मशास्त्र के अनुसार गर्भाधान आदि सोलह संस्कार मनुष्य के शारीरिक एवं मानसिक परिष्कार के लिए किये जाते हैं। पराशर स्मृति में इनका उल्लेख इस प्रकार हुआ है-

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।
नामक्रियानिष्क्रमणोऽन्नप्राशनवपनक्रिया॥
कर्णवेध्ये व्रतादेशे वेदारम्भक्रियाविधिः।
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहौ।
चिताग्निसङ्ग्रहश्चैव संस्काराः षोडशः स्मृताः॥

संस्कृत-टीका- (भा०च०सि०च० टीका)

काममत्यर्थं सकलशास्त्रवेत्तृभिः शिक्षिते त्वय्युपदेशो व्यर्थं इत्यर्थः। पुनराह-प्रकृत्येति। प्रकृत्या स्वभावेन धीरो धैर्यवान्। यद्यपीति पूरणीयम्। कीदृक्। पित्रा चेति पित्रा चकारान्मयापि समारोपिता विहिताः संस्कारा जातकर्मादयः। अथ च तत्तद्गुणाविशेषाश्च यस्यैवम्भूतः। अथवान्यदप्याह-तरलेति। तरलं चञ्चलं हृदयं चेतो यस्य स तमप्रतिबुद्धं बोधरहितं च पुरुषं धनानि द्रव्याणि मदयन्ति मदं जनयन्ति। अहं तु न

तथानुनयामीति। येनोपदेशः सार्थकः स्यादिति तदभिप्रायमाशङ्कयोत्तरमाहतथापीति। अनुपदेश्यत्वेऽपि भवद्गुणः शौर्यादिभिर्यः सन्तोषो मनसंस्तुष्टिर्मां शुकनासमेवं पूर्वोक्तप्रकारेण मुखरीकृतवांस्तादृग्वाग्व्यापारे प्रवर्तितवान्।

व्याकरणात्मक विशेषतायें-

1. धीरः- धी+ √रा+क प्र॰वि॰ए॰व॰।
2. समारोपितसंस्कारः- सम्यक् आरोपितः इति कर्म॰ (समारोपितः) समारोपितः संस्कारः यस्मिन् सः इति बहु॰।
3. तरलहृदयम्- तरलं हृदयं यस्य सः इति बहु॰ (तम्)।
4. अप्रतिबुद्धम्- नं प्रतिबुद्धः इति नञ् तत्पु॰। (प्रति √बुध्+क्त) तम्।
5. मदयन्ति- √मद् लट् ल॰प्र॰पु॰ब॰व॰।
6. भवद्गुणसन्तोषः- भवतः गुणाः इति ष॰तत्पु॰। तैः सन्तोषः इति तृ॰तत्पु॰।
7. मुखरीकृतवान्- मुखर+च्वि √कृ+क्तवतु प्र॰वि॰ए॰व॰।

इदमेव च पुनःपुनरभिधीयसे- विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति।

शब्दार्थ-

च=और। पुनः पुनः= बार-बार। इदमेव=यही। अभिधीयसे=कहे जाते हो। इयं=यह (पूर्वोक्त स्वरूप वाली)। दुर्विनीता=दुष्टा। लक्ष्मी=लक्ष्मी। विद्वांसमपि=विद्वान को भी। सचेतनमपि=ज्ञानयुक्त को भी। महासत्त्वमपि=अत्यन्त शक्तिशाली को भी, अभिजातमपि=उच्चकुलोत्पन्न को भी, धीरमपि=धैर्यशाली को भी। प्रयत्नवन्तमपि=उद्योगशील (परिश्रमी) को भी। नरं=मनुष्य को। खलीकरोति=दुष्ट बना देती है।

अनुवाद -

और बार-बार तुमसे यही कहा जाता है कि यह दुराचारिणी लक्ष्मी विद्वान, विवेकी, महाबलशाली, कुलीन, धैर्यवान और प्रयत्नशील पुरुष को भी दुर्जन बना देती है।

संस्कृत-टीका- (भा॰च॰सि॰च॰ टीका)

इयं पूर्वोक्तं पुनः पुनर्वारंवारमधिधीयसे कथ्यसे। अहार्यशङ्कामुद्घाटयति-विद्वांसमिति। विद्वांसमपिपण्डितमपि सचेतनमपि ज्ञानवन्तमपि महासत्त्वमपि महासाहसमप्यभिजातमपि कुलीनमपि धीरमपि धैर्यवन्तमपि प्रयत्नवन्तमप्युद्योगयुक्तमपि पुरुष लक्ष्मीः श्रीः खलीकरोति सन्मार्गात्स्खलनां

प्रापयति। अत्र सर्वत्रापिशब्दः कैमुतिकन्यायपरः अयमप्येवं करोति। अन्यस्य का वार्तेत्यर्थः। तत्र हेतुमाहयत इयं दुर्विनीता। अपगतविनयेत्यर्थः।

व्याकरणात्मक विशेषतायें -

1. अभिधीयसे-अभि √धा+यक् लट् ल॰म॰पु॰ए॰व॰।
2. अभिजातम्- अभि √जन्+क्त द्वि॰वि॰ए॰व॰।
3. प्रयत्नवन्तम्- प्र √यत्+मतुप् द्वि॰वि॰ए॰व॰।
4. दुर्विनीता- दुष्टं विनयं यस्याः सा इति बहु॰ दुर्+वि √नी+क्त+टाप्।
5. खलीकरोति-, खल+च्वि √कृ लट् ल॰प्र॰पु॰ए॰व॰।

सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्याभिषेकमङ्गलम्। कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्। अवनमय द्विषतां शिरांसि उन्नमय बन्धुवर्गम्।

शब्दार्थ -

भवान्=आप्। पित्रा=पिता के द्वारा। सर्वथा=सब प्रकार के। कल्याणै=मंगलाचारों से। क्रियमाणम्=किये जाते हुए। नव=नये। यौवराज्याभिषेकमङ्गलम्=यौवराज्याभिषेक के मंगल (कल्याण) को। अनुभवतु=अनुभव करें। कुलक्रमागताम्=वंश परम्परा से प्राप्त। पूर्वपुरुषैरूढां=पूर्वजों के द्वारा धारण किये जाते हुए। धुरम्=राज्यभार को। उद्वह=धारण करो। द्विषतां=शत्रुओं के। शिरांसि=सिरों को। अवनमय=झुकाओ। बन्धुवर्गम्=बन्धुवर्ग को। उन्नमय=उन्नत करो।

अनुवाद -

आप पिता के द्वारा सब प्रकार के मंगल कार्यों से किये जाते हुए नये यौवराज्याभिषेक के मंगल का अनुभव करें। वंश परम्परा से प्राप्त, पूर्वजों के द्वारा धारण किये जाते हुए राज्यभार को धारण करें। शत्रुओं के सिरों को झुकायें और बन्धुवर्ग की उन्नति करें।

संस्कृत-टीका- (भा॰च॰सि॰च॰ टीका)

भवांस्त्वं पित्रा जनकेन कल्याणैर्मङ्गलैः क्रियमाणं विधीयमानं नवयौवनस्य यो राज्याभिषेकस्तल्लक्षणं यन्मङ्गलं श्रेयोऽनुभवत्वनुभवविषयीकरोतु। पूर्वपुरुषैरूढां कुलक्रमागतां परम्परायातां धुरं राज्यभारमुद्वहोद्वहनं कुरु। अवेति। द्विषतां शत्रूणां शिरांस्युत्तमाङ्गान्यवनमय नम्राणि कुरु। स्वबन्धुवर्गं स्वजनसमुदायमुन्नमयोर्ध्वीकुरु।

व्याकरणात्मक विशेषतायें -

1. क्रियमाणम्- √कृ+यक्+शानच् द्वि॰वि॰ए॰व॰।

2. नवयौवराज्याभिषेकमङ्गलम्- यौवराज्याय अभिषेकः इति यौवराज्याभिषेकः इति च॰तत्पु॰। नवो योयौवराज्याभिषेकः इति क॰धा॰। स एव मङ्गलं इति क॰धा॰। तत्।
3. कुलक्रमागताम्- कुलस्य क्रमः इति ष॰तत्पु॰। कुलक्रमात् आगतम् इति पं॰ तत्पु॰। ताम्। धूः पद का विशेषण।
4. उद्वह- उत् उप॰ √वह् लोट् ल॰म॰पु॰ए॰व॰।
5. पूर्वपुरुषैः- पूर्वे च ते पुरुषाः पूर्वपुरुषाः इति क॰धा॰। तैः।
6. ऊढाम्- √वह्+क्त+टाप् द्वि॰वि॰ए॰व॰। धूः पद का विशेषण।
7. अनुभवतु- अनु √भू लोट् ल॰म॰पु॰ए॰व॰।
8. अवनमय- अव √नम्+णिच्+लोट् ल॰म॰पु॰ए॰व॰।
9. शिरांसि-शिरस् द्वि॰वि॰ब॰व॰।
10. उन्नमय-उत् √नम् लोट् ल॰म॰पु॰ए॰व॰।

अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।

शब्दार्थ -

च=और। अभिषेकानन्तरं=अभिषेक के पश्चात्। प्रारब्धदिग्विजयः=प्रारम्भ की हुयी दिग्विजय वाले (तुम)। तव=अपने। पित्रा=पिता द्वारा। विजितामपि=जीती हुयी भी। परिभ्रमन्= घूमते हुए। सप्तद्वीपभूषणां=सात द्वीपों रूपी आभूषणों वाली। वसुन्धराम्=पृथ्वी को। पुनर्विजयस्व=फिर से जीतो।

अनुवाद -

और अभिषेक के पश्चात् दिग्विजय आरम्भ किये हुए घूमते हुए अपने पिता द्वारा जीती हुयी भी सात द्वीपों रूपी आभूषणों वाली पृथ्वी को फिर से स्वाधीन करो (विजित करो अथवा जीतो)।

संस्कृत-टीका- (भा॰च॰सि॰च॰ टीका)

अभीति। अभिषेकानन्तरं यौवराज्याभिषेकादनु। प्रारब्धेति। प्रारब्धः प्रस्तुतो दिग्विजयो येन सः परिभ्रमन्प्रतिदिशं दिशं दिशं प्रतिगच्छंस्तव पित्रा च त्वज्जनकेन विजितामपि स्वायत्तीकृतामपि सप्तद्वीपभूषणं सप्तसङ्ख्याका द्वीपा जम्बूप्रभृतयो भूषणं यस्या एवंविधा वसुन्धरां पुनर्द्वितीयवारं विजयस्व स्वायत्तीकुरु। यमिति।

व्याकरणात्मक-विशेषतायें -

1. अभिषेकानन्तरं-अभिषेकस्य अनन्तरं इति ष॰तत्पु॰।
2. प्रारब्धदिग्विजयः- दिशां विजयः इति दिग्विजयः इति ष॰तत्पु॰। प्रारब्धः

दिग्विजयः येन सः इति बहु०।

3. परिभ्रमन्- परि √भ्रम् शतृ प्र०वि०ए०व०।

4. सप्तद्वीपभूषणाम्-सप्तानां द्वीपानां समाहारः इति द्विगु स०। सप्तद्वीपाः भूषणानि यस्याः इति बहु०। ताम्।

सात द्वीपों के नाम हैं-

जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः।।

5. विजयस्व- वि √जि लोट् ल०म०पु०ए०व०।

6. वसुन्धराम्- वसूनि धारयति इति वसुन्धरा, ताम्। द्वि०वि०ए०व०।

अयं च ते कालः प्रतापमारोपयितुम्। आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवतीत्येतावदभिधायोपशशाम।

शब्दार्थ -

ते=तुम्हारा। अयं=यह। कालः=समय। प्रतापं=तेज को। आरोपयितुम्=दिखाने का है। हि=क्योंकि। आरूढप्रतापः=प्रतापी। राजा=राजा। त्रैलोक्यदर्शीव=त्रिलोकीद्रष्टा योगी के सामान। सिद्धादेशः=निष्पन्न आदेश वाला। भवति=होता है। एतावत्=इतना। अभिधाय=कहकर। उपशशाम=शान्त हो गया।

अनुवाद -

और यह तुम्हारा प्रताप स्थापित करने (या फैलाने) का समय है। क्योंकि प्रतापवान् राजा त्रिलोकदर्शी (योगी) के समान सिद्धादेश (अव्याहत आज्ञा वाला) होता है। इतना कहकर (शुकनास) चुप हो गया।

टिप्पणी -

प्रताप जमाने का तात्पर्य है कि युवराज को राज्यलक्ष्मी वंश परम्परा से प्राप्त हुयी है। पिता के द्वारा जीती गयी पृथ्वी पर शासन करने से अधीनस्थ राजा उतना सम्मान नहीं करेंगे जितना कि स्वयं के पराक्रम से जीतने पर। इसलिए दिग्विजय के माध्यम से सम्पूर्ण प्रजा एवं अधीनस्थ राजाओं पर प्रभाव जमाने का उपदेश दिया गया है। सिद्धादेश का तात्पर्य है कि जिस प्रकार त्रिलोकदर्शी योगी भूत, भविष्य और वर्तमान के ज्ञाता होते हैं और उनके द्वारा कही गयी बात किसी भी परिस्थिति में अवश्य पूर्ण होती है। उसी प्रकार प्रतापी राजा का सभी इतना आदर करते हैं कि उसके द्वारा दी गयी आज्ञा, कहते ही पूर्ण हो जाती है।

संस्कृत-टीका- (भा०च०सि०च० टीका)

प्रतापं कोशदण्डजं तेन आरोपयितुं लब्धास्पदं कर्तुं ते तवायं कालः समयः। समागत इति शेषः। तस्य फलं प्रदर्शयन्नाह-आरूढेति। आरूढो

लब्धास्पदः प्रतापो यस्यैवम्भूतो राजा त्रैलोक्यदर्शीव योगीव सिद्धो निष्पन्न आदेश आज्ञा यस्य स तथा त्रिकालदर्श्यपि सिद्धादेशो भवति। यथा वदति तथैव भवतीत्यर्थः। इतीति। इति परिसमाप्तावेतावन्मात्रमभिधायोक्त्वोपशशाम विरतवाग्व्यापारो बभूव।

व्याकरणात्मक विशेषतायें -

1. आरोपयितुम्-आङ् √रुह्+णिच् (पुक्)+तुमुन्।
2. आरूढप्रतापः- आरूढः प्रतापः यस्य सः इति बहु०।
3. सिद्धादेशः- सिद्धः आदेशः यस्य सः इति बहु०।
4. त्रैलोक्यदर्शीव-त्रयाणां लोकानां दर्शी इति ष०तत्पु० (√दृश्+णिनि) प्र०वि०ए०व०।
5. अभिधाय अभि √धा+ल्यप्।
6. उपशशाम- उप √शम् लिट् ल०प्र०पु०ए०व०।

विशेष - त्रैलोक्यदर्शीव में उपमा अलंकार है।

उपशान्तवचसि शुकनासे चन्द्रापीडस्ताभिरमलाभिरुपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, निर्मृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलङ्कृत इव, पवित्रीकृत इव, उद्भासित एव प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम।

शब्दार्थ -

शुकनासे=शुकनास के। उपशान्तवचसि=चुप हो जाने पर। चन्द्रापीड=चन्द्रापीड। ताभिः=उन। अमलाभिः स्वच्छ। उपदेशवाग्भिः=उपदेश वचनों से। प्रक्षालित इव=धुला हुआ सा। उन्मीलित इव=विकसित हुआ सा या जागा हुआ सा। स्वच्छीकृत इव=स्वच्छ किया हुआ सा। निर्मृष्ट इव=माँजा हुआ सा। अभिषिक्त इव=नहाया हुआ सा। अभिलिप्त इव=(चन्दन आदि से) लिपा हुआ सा। अलङ्कृत इव=सजाया हुआ सा। पवित्रीकृत इव=पवित्र किया हुआ सा। उद्भासित इव=चमकाया हुआ सा। प्रीतहृदयो=प्रसन्नचित्त हुआ। मुहूर्तं=कुछ देर (दो घड़ी)। स्थित्वा=रुककर। स्वभवनम्=अपने भवन में। आजगाम=आ गया।

अनुवाद -

शुकनास के चुप हो जाने पर चन्द्रापीड उन स्वच्छ उपदेश वचनों से धुला हुआ सा, विकसित हुआ सा (या जागा हुआ सा), स्वच्छ किया हुआ सा, माँजा हुआ सा, नहाया हुआ सा, लिपा हुआ सा, सजा हुआ सा, पवित्र किया हुआ सा, चमकता हुआ सा प्रसन्नचित्त (होकर) कुछ देर रुककर अपने भवन में आ गया।

संस्कृत-टीका- (भा०च०सि०च० टीका)

उपेति। उपशान्तवचस्युपरतवाग्व्यापारे तस्मिञ्शुकनासे सति

चन्द्रापीडस्ताभिः पूर्वोक्ताभिरुपदेशवाग्भिः शिक्षावचनैः प्रक्षालित इव धौत इव, उन्मीलित इव विकसित इव, स्वच्छीकृत इव स्वच्छतां प्रापित इव, निर्मृष्ट इव मसृणीकृत इव, अभिषिक्त इव स्नापित इव, अभिलिप्त इव प्रलिप्त इव, अलङ्कृत इव भूषित इव, पवित्रीकृत इव पावनीकृत इव उद्भासित इवोद्दीप्त इव। प्रीतेति। प्रीतं सन्तुष्टं हृदयं चेतो यस्येवम्भूतो मूहूर्तं घटिकाद्वय स्थित्वावस्थानं कृत्वा स्वभवनं निजसद्न्माजगामाययौ।

व्याकरणात्मक विशेषतायें -

1. उपशान्तवचसि-उपशान्तं वचः यस्य सः इति बहु॰। तस्मिन्। शुकानासे पद का विशेषण।
2. उपदेशवाग्भिः- उपदेशस्य वाग्भिः इति ष॰तत्पु॰।
3. प्रक्षालितः- प्र√क्षल् शौचकर्मणि+क्त प्र॰वि॰ए॰व॰।
4. उन्मीलितः- उत् √मील् निमेषणे+क्त॰ प्र॰वि॰ए॰व॰।
5. स्वच्छीकृतः- स्वच्छ-च्वि √कृ+क्त प्र॰वि॰ए॰व॰।
6. निर्मष्टः- निर् √मृज् शुद्धौ+क्त प्र॰वि॰ए॰व॰।
7. अभिषिक्तः- अभि √सिच् क्षरणे+क्त प्र॰वि॰ए॰व॰।
8. अभिलिप्तः- अभि √लिप् उपदेहे+क्त प्र॰वि॰ए॰व॰।
9. अलङ्कृतः- अलम् √कृ+क्त प्र॰वि॰ए॰व॰।
10. पवित्रीकृतः- पवित्र+च्वि √कृ+क्त प्र॰वि॰ए॰व॰।
11. उद्भासितः- उत् √भस् भर्त्स्नदीप्त्योः+क्त प्र॰वि॰ए॰व॰।
12. आजगाम- आ √गम् लिट् ल॰ प्र॰पु॰ए॰व॰।
13. प्रीतहृदयः- प्रीतं हृदयं यस्य सः इति बहु॰।

परिशिष्ट

शुकनासोपदेश में सूक्तियाँ

1. निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्।
2. अपरिणामोपशमो दारुणो लक्ष्मीमद:।
3. अनञ्जनवर्तिसाध्यं ऐश्वर्यतिमिरान्धत्वम्।
4. अशिशिरोपचारहार्योऽतितीव्रो दर्पदाहज्वरोष्मा।
5. अमूलमन्त्रशम्य विषमो विषयविषास्वादमोह:।
6. अस्नानशौचवध्यो: बलवान् रागमलावलेप:।
7. अक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति।
8. यौवनारम्भे च प्राय: शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धि:।
9. इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयम् उपभोगमृगतृष्णिका।
10. नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तक: पुरुषमत्यासङ्गो विषयेषु।
11. अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणा:।
12. कुसुमशरशरप्रहारजर्जरिते हि हृदि जलमिव गलत्युपदिष्टम्।
13. अकारणञ्च भवति दुष्प्रकृतेरन्वय: श्रुतं वा विनयस्य।
14. गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्।
15. प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्।
16. अहङ्कारदाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृति:।
17. अलीकाभिमानोन्मादकारीणि धनानि।
18. राज्यविषविकारतन्द्राप्रदा राजलक्ष्मी:।
19. नह्येवं विधमपरम् अपरिचितमिह जगति किञ्चिदस्ति यथेयमनार्या लक्ष्मी:।
20. गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला।
21. आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति।
22. लतेव लक्ष्मीर्विटपकानमध्यारोहति।
23. लक्ष्मीरियं सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम्।
24. परस्परविरुद्धञ्चेन्द्रजालमिव दर्शयन्ती लक्ष्मी: प्रकटयति जगति निज चरितम्।
25. तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि।

सहायक-ग्रन्थ

1. अग्रवाल, वासुदेवशरण-कादम्बरी: एक सांस्कृतिक अध्ययन। चौखम्भा विद्याभवन। वाराणसी। द्वि॰सं॰, 2026.
2. उपाध्याय, बलदेव- संस्कृत साहित्य का इतिहास, शारदा निकेतन, वाराणसी, 1978 ई॰ सन्।
3. कीथ, ए॰बी॰ - संस्कृत साहित्य का इतिहास। अनु॰ मंगलदेव शास्त्री। मोतीलाल बनारसीदास। वाराणसी, 1967 पुनर्मुद्रण 1986 ई॰ सन्।
4. झा, तारिणीश - शुकनासोपदेश। रामनारायणलाल बेनीमाधव, इलाहाबाद, 1967 ई॰ सन्।
5. नारंग, सुदेश - शुकनासोपदेश। भारतीय विद्या प्रकाशन, आई.यू.बी. जवाहर नगर, बैंग्लो रोड, दिल्ली-110007
6. पाण्डेय, अमरनाथ - बाणभट्ट का आदान-प्रदान। शब्दलोक प्रकाशन, वाराणसी, 1967.
7. पाण्डेय, अमरनाथ - बाणभट्ट का साहित्यिक अनुशीलन। भारतीय विद्या प्रकाशन, वाराणसी-दिल्ली, 1974.
8. पाण्डेय, चन्द्रशेखर तथा नानूराम व्यास - संस्कृत साहित्य की रूपरेखा। साहित्य निकेतन, कानपुर, 1982.
9. प्रह्लादकुमार - शुकनासोपदेश। मेहरचन्द लक्ष्मनदास पब्लिकेशन्स, नई दिल्ली, 1988.
10. रणदेव तथा थापन, महेन्द्र-गद्यकार बाण। पंजाब प्रादेशिक हिन्दी साहित्य सम्मेलन। जालन्धर, 1967.
11. सक्सेना, रमा- शुकनासोपदेश। भारतीय शोध संस्थान, इन्दौर, 1952.

अन्य छात्रोपयोगी ग्रन्थ

संस्कृतपाठ्यसंकलन	डॉ. शशि तिवारी
दूतवाक्यम्	डॉ. शशि तिवारी
केनोपनिषद् (भूमिका और व्याख्या)	डॉ. शशि तिवारी
राष्ट्रीयता एवं भारतीय साहित्य	डॉ. शशि तिवारी
गीता विमर्श	डॉ. शशि तिवारी
पञ्चतन्त्रम् (अपरीक्षितकारकम्)	डॉ. पुष्पा गुप्ता
मुण्डकोपनिषद्	डॉ. जियालाल कम्बोज
उत्कीर्णलेखस्तबकः	डॉ. जियालाल कम्बोज
सौन्दरनन्दमहाकाव्यम्	डॉ. जियालाल कम्बोज
संस्कृत निबन्धाञ्जलिः	डॉ. सावित्री गुप्ता
किरातार्जुनीयम् (प्रथम सर्ग)	डॉ. सावित्री गुप्ता
किरातार्जुनीयम् (1-2 सर्ग)	डॉ. सावित्री गुप्ता
छन्दोऽलङ्कारसौरभम्	डॉ. सावित्री गुप्ता
प्रतिमानाटकम्	डॉ. सावित्री गुप्ता
नीतिशतकम्	डॉ. सावित्री गुप्ता
मनुस्मृतिः (द्वितीय अध्याय)	डॉ. राकेश शास्त्री
मनुस्मृतिः (सप्तम अध्याय)	डॉ. राकेश शास्त्री
नाट्यशास्त्रम् (1,2,6 अध्याय)	प्रो. ब्रजमोहन च[illegible]
ईशावास्योपनिषद्	डॉ. शर्मिष्ठा शर्मा
लघुसिद्धान्तकौमुदी	डॉ. रमण कुमार शर्मा
शुकनासोपदेशः	डॉ. अर्चना [illegible]
पञ्चतन्त्रम् (लब्धप्रणाशम्)	डॉ. कमलेश [illegible]
वैदिकसूक्तमञ्जरी	डॉ. कामिनी तनेजा
आधुनिक संस्कृत साहित्य संचयन	डॉ. गिरीशचन्द्र पंत
मन्दारमञ्जरी	डॉ. युद्धवीर सिंह
संस्कृत-भाषा-नैपुण्यम्	डॉ. कान्ता भाटिया
रघुवंशमहाकाव्यम् (द्वितीयः सर्गः)	डॉ. निशा गोयल

VIDYANIDHI PRAKASHAN
D-10/1061, (Near Shri Mahagauri Mandir)
Khajuri Khas, Delhi-110094
M. : 09868912570, 09868351990
email : vidyanidhiprakashan@hotmail.com